कविकल्पलता ।

श्रीमता देवेश्वरेण विरचिता,

तेनैव कृतया टीकया च सहिता,

श्रीशरच्चन्द्रशास्त्रिणा

सम्पादिता ।

कविकल्पलता ।

ॐ नमो गणेशाय[१] ।

ावारिभिरक्षिताः फणिफणीकृत्पल्लवास्तच्छिखा-
ः कोरकिताः सुधांशुकलया[२] स्मेरैकपुष्पश्रियः ।
नन्दा... ताक्षिहुतभुग्धूमैर्मिलद्दोहदा
ल्पं कल्प...ः फलं ददतु वोऽभीष्टं जटा धूर्जटेः ॥१॥
लवेन्द्रमहामात्यश्रीमद्वाग्भटनन्दनः ।
श्वरः प्रतनुते कविकल्पलतामिमाम् ॥ २ ॥
नभाभावितात्मानः कवित्वं के न कुर्वते ।
श्चन कविताधानकुशला विरलाः पुनः ॥ ३ ॥
न्यैर्वर्त्म न क्षुण्णं तत्र सञ्चरतो मम ।
पदे प्रस्खलतः सन्तः सन्त्ववलम्बनम्[४] ॥ ४ ॥

कविशिक्षाशतं वीक्ष्य कवीन्द्रान् उपजीव्य च ।
निबद्धेयं मया धीरास्त्वरितश्लोकसिद्धये ॥ ५ ॥
सुवृत्तरम्यस्तवका सदालिपरिशीलिता ।
कविकल्पलता सेयममला परिशील्यताम् ॥ ६ ॥
शब्दश्लेषकथार्थाख्याश्चत्वारस्तवका इह ।
ते चतुः पञ्चषट्सप्तकुसुमैरन्विताः क्रमात् ॥ ७ ॥
तत्राद्यस्तवके[1]च्छन्दोऽभ्यासः सामान्यशब्दकः ।
वर्णस्थितिरनुप्रासः कुसुमानि यथाक्रमम्[2] ॥ ८ ॥

(५) कविशिक्षाशतेत्यादि । भो धीराः, ा इयं क
कल्पलता मया निबद्धा, किमर्थं? त्वरितं शीघ्रं श्लोकानां सि
सम्पत्तये, किं कृत्वा कविशिक्षाशतं वीक्ष्य, कवयः शिक्ष्यन्तेऽ
इति कविशिक्षा कवित्वोपायग्रन्थस्तेषां शतम् असंख्यातं
कवीन्द्रान् कविश्रेष्ठान् उपजीव्य अनुशील्य च तेभ्यः
कवित्वोपायप्रसरमिति यावत् ।

(६) सुवृत्तेत्यादि । शोभनं यद्वृत्तं पद्यं तेन रम्यः स्त

छन्दोऽभ्यासप्रसक्तेऽत्र नेत्रभूते[1] विपश्चिताम्।
कथ्यन्ते केऽपि शब्दा यैश्छन्दो मन्दोऽपि विन्दति ॥९॥
श्रीलक्ष्मीः कमला पद्मालया च हरिवल्लभा।
दुग्धाब्धिनन्दिनी[2] क्षीरसागरापत्यमित्यपि ॥१०॥
क्षीरपाथोधितनयेत्येवमेकाक्षरादिकम्।
आदौ साध्यं पदं स्थाप्यं शेषं कुर्याद्विशेषणैः[3] ॥११
विशेष्योऽर्थोवर्णाकाराधाराधेयक्रियागुणैः।
सादृश्यपरिवाराद्यैः क्रियते सविशेषणैः ॥१२॥

यथा सुधांशुर्धवलोऽतिवृत्तः
कान्तान्तरीक्षा[4] हरिणं दधानः।
महत्तमो घ्नन् जनतापहारी
मृगेन्द्रवद्राजति ऋक्षमध्ये ॥१३॥

बन्धुश्चौरः सुहृद् वादी कल्पः प्रख्यः प्रभः समः ।
द्वेषीयद्वेष्यरिप्राभसोदराद्या इवार्थकाः ॥ १४ ॥

धवलः शुक्लोऽतिवृत्तोऽत्यन्तवर्त्तुलाकारोऽतिक्रान्तचरित्रश्च क्रान्तान्तरीक्षः प्राप्ताकाशो हरिणं मृगं दधानः पक्षे उत्प्लुत्याक्रान्तान्तरीक्षः सन् हरिणं बिभ्रदित्यर्थः । महत्तमो घ्नन् महान्धकारं नाशयन् पक्षे महत्तमोऽतिमहान्, घ्नन् हिंसात्मक इत्यर्थः । जनतापहारी जनानां तापं तपादिजन्यक्लेशमपहर्त्तुं शीलमस्येति पक्षे जनताया जनसमूहस्य अपहारी अपहर्त्ता नभः । अत्र क्रमेण धवलादिविशेषणपदैर्वर्णाद्याकारादीनामुदाहरणानाम् ॥

(१४) सादृश्यप्रस्तावे तदभिधायकान् शब्दान् अभिधत्ते बन्धुरित्यादि बन्धुपर्यायास्तेन बान्धवदायादादयः । चौर इति चौरपर्य्यायास्तेन तस्करमोषकारापहारकादयः । सुहृदिति सुहृत्पर्य्यायास्तेन मित्रसख्यादयः । वादीति वादिपर्य्यायास्तेन वावदूक-वदावद-वाचाट-वक्तृ-प्रतिवक्तृप्रभृतयोऽप्यूह्याः । कल्प इति कल्प-

यथेन्दुबन्धुर्मुक्ताश्रीर्योगे हारश्रियः सुहृत् ।
कुन्दवादी हंसकल्पः क्षीरप्रख्यो हिमप्रभः ॥ १५ ॥
गङ्गासमोऽब्जदेशीयः शङ्खदेश्यः सुधारिपुः ।
विसाभस्तेजसोराशिः कैलाससोदरः ॥ १६ ॥
कथानगरसर्वार्थनित्यकृत्यादिवर्णनैः ।
लोकानां हृष्टचेष्टाभिश्छन्दोऽभ्यासक्रमो यथा ॥ १७ ॥
आसीद् दशरथो राजा चत्वारस्तस्य सूनवः ।
रामलक्ष्मणशत्रुघ्नभरता इति विश्रुताः ॥ १८ ॥
ध्वस्तध्वान्तभरं रत्नवेश्मविस्मेररश्मिभिः ।
राजधानीदिनस्येव तत्पुरं द्योतते सदा ॥ १९ ॥

प्रतीयते रूढः प्रयोजनाद्वासौ लक्षणा शक्तिरर्पिता । एतानेवोदाहरति यथेति विसाभः विसं मृणालं तत्सदृशम् अन्यत् स्पष्टम् ।

(१९) राजधानी तत्पुरमिति तत्प्रसिद्धं पुरं नगरं तस्य

प्रत्यर्थिपृथ्वीहृदयाधिनाथ
ध्वान्तौघविध्वंसनवासरेशः ।
सन्नीतिवल्लीवनवारिवाहो
विश्वम्भराया दयितो विभाति ॥ २६ ॥

दुर्द्धरारिधरणीधरोद्धत
ध्वान्तमण्डलविखण्डनांशुमान् ।
नीतिवल्लीवननूतनाम्बुदो
मेदिनीपरिवृढो विराजते ॥ २७ ॥

यतिभङ्गो नामधातुभागभेदे भवेद् यथा ।
पुनातु नरकारिश्चक्रभूषितकराम्बुजः ॥ २८ ॥
दिविषद्द्वन्द्ववन्द्यं वन्दे गोविन्दपदद्वयम् ।
स्वरसन्धौतु न श्रीशोऽस्तु भूत्यै भवतो यथा ॥ २९ ॥
न स्याद्विभक्तिभेदे भात्येष राजेति कुत्रचित्[1] ।
क्वचित्तु स्याद् यथा देवाय नमश्चन्द्रमौलये ॥ ३० ॥

स्थाली भात्यन्नपूर्णेयमर्णोभिः[1] शोभते घटः ।
पटः संलक्ष्यते सूक्ष्मः साक्षाल्लक्ष्मीरियं वधूः ॥ २० ॥

प्रातः कृतश्रमः स्नातोऽर्चितदेवो हुतानलः ।
भुक्तान्नः श्रुतसच्छास्त्रः सायं शय्यागृहं ययौ ॥ २१ ॥

पुष्पाणि पाणिदेशेऽसौ कृत्वा क्रीडति कामुकः ।
ताम्बूलिकोऽत्र ताम्बूलमस्य पश्चादर्पयत्यसौ[2] ॥ २२ ॥

तदर्थान्यपदैः स्वान्यश्लोकस्य[3] परिवर्त्तनात् ।
तत्रैव छन्दस्यभ्यस्येदथ छन्दोऽन्तरे यथा ॥ २३ ॥

प्रत्यर्थिपृथिवीपालतमोजालदिवाकरः ।
नीतिव्रततिपर्जन्यो राजते जगतीपतिः ॥ २४ ॥

प्रत्यनीकावनीकान्तध्वान्तविध्वंसनांशुमान् ।
नयवल्लीवनाम्भोदः शोभते भूमिवल्लभः ॥ २५ ॥

चादयो न प्रयोक्तव्या विच्छेदात् परतो यथा ।
नमः शिवाय कृष्णाय च दानवविनाशिने ॥ ३१ ॥
एकस्वरोपसर्गेण विच्छेदः श्रुतिसौख्यकृत् ।
यथा पिनाकपाणिं प्रणमामि स्मरशासनम् ॥ ३२ ॥
एवं यथा यथोद्वेगः सुधियां नोपजायते ।
तथा तथा मधुरता निमित्तं यतिरिष्यते ॥ ३३ ॥
अबुद्धार्थापि मधुरा मनो हरति भारती ।
तमोनिचयसङ्काशा मञ्जुला देवकोकिला ॥ ३४ ॥

(३२) एकस्वरोपसर्गेणेति एकस्वरो यस्य एवम्भूतो य उपस
प्रादिस्तेन ।

इति प्रथमस्तवके छन्दोऽभ्यासो नाम प्रथमं कुसुमम् ॥

सामान्यशब्दाः कथ्यन्ते क्रमादेकाक्षरादयः ।

एकाक्षरम् ।

ओ भो हे हि नु नि प्र त्वं ।
वि प्राग् आ मत् सु सं तथा ॥ १ ॥
ओंकृष्ण भो केशव हे हरे द्राङ्
निष्पीडितारे सुमतिं प्रयच्छ ।
निकाममासेव्य विभासि नु त्वं
सद्योगिनां चेतसि सङ्गतो हि ॥ २ ॥

द्व्यक्षरम् ।

स्फुटं स्फूर्जत् स्फुरत् स्फारं सारं तारं वरं परम् ।
प्राग्रं[1] प्राज्यं प्रियं ज्येष्ठं प्रेष्ठं श्रेष्ठं मुहुर्वहु ॥ ३ ॥
कौर्त्यं काम्यं कम्रं कान्तं मञ्जु मङ्क्षु महन्मिलत् ।
गाढं वाढं दृढं प्रौढं बलात् बलाक्षलल्लुलत् ॥ ४ ॥
स्वैरं सम्यक् सदा शश्वत् सत्यं नित्यं ध्रुवं द्रुतम् ।

त्र्यक्षरम्।

झटिति प्रकटं सपदि प्रसभं[1]
निविडं रुचिरं सुभगं प्रचुरम्[2]।
विकसद्विहसद्विचरद्विलसद्[3]
विमलं सकलं बहुलं[4] प्रबलम् ॥ ७ ॥
सर्व्वदा सर्व्वथा सर्व्वतः शीघ्रतः
सत्वरं सन्ततं निश्चितं वेगतः।
उच्चकैरञ्जसा नित्यशः सुन्दरं
पेशलं मञ्जुलं प्रोल्लसद्विस्फुरत् ॥ ८ ॥
प्रोद्दाम विभ्राज दुत्तुङ्ग विस्फुर्ज्ज
दुत्तान शोभाढ्य विस्फार विक्रीड़त्।
सच्छाय सच्छोभ निःशङ्क निःशेष
मित्थं बुधैस्त्र्यक्षरं वै प्रयोज्यम्[5] ॥ ९ ॥

चतुरक्षरम्।

रथादेव जवादेव सर्व्वकालं सुनिश्चितम् ।
स्फारशोभं प्रभायुक्तं स्फुरच्छायं श्रियायुतम्[1] ॥ ११ ॥
वराभोगं बहुश्रीकं लसत्कान्ति स्फुरद्यशः ।
घनच्छायं झटित्येव शोभायुक्तं विकस्वरम् ॥ १२ ॥

पञ्चाक्षरम् ।

प्रवरश्रीकं रुचिरच्छायं स्फुटलक्ष्मीकं बहलश्रीमत् ।
कलयायुक्तं विकसद्रोचिः प्रचुरज्योतिर्द्युतिरोचिष्णु ॥१३॥
विलसच्छवि प्रसरत्प्रभं[2] प्रसरद्रसं सुषमामयम् ।
बहुवैभवं रुचिभासुरं कलयान्वितं मलवर्ज्जितम् ॥१४॥
स्फुरितोदयं खचितं श्रिया विकटोच्छ्रयं प्रमदालयम् ।
घनविभ्रमं भुवनाद्भुतं वरदीधिति द्युतिसुन्दरम्[3] ॥१५॥

षडक्षरम् ।

अद्भुतवैभवमक्षिमहोत्सव

कान्तिनिकेतनामद्भुतमाकृति
चारुतरच्छवि सुन्दरदीधिति ॥ १६ ॥

मनोहरच्छायमुदञ्चितद्युति
स्फुरत्प्रभाचारु घनश्रिया युतम् ।
समुल्लसत्कान्ति विभाविभासितं
निवेश्यमित्थन्तु षडक्षरं पदम्[१] ॥ १७ ॥

अष्टाक्षरम् ।

समुल्लसितशोभाढ्यो रोचिर्निचयरोचितः ।
चारुचञ्चत्कलाशाली कान्तकान्तिनिकेतनम् ॥ १८ ॥
वल्गुवल्गद्वपुर्लक्ष्मी महामहिममन्दरम्[१] ।
आभासम्भारसंशोभी दीप्तिमण्डलमण्डितः ॥ १९ ॥
प्रभाप्राग्भारसारश्रीरुद्यद्द्युतरद्युतिः[२] ।
मनोरमतमच्छायो विभावैभवशोभितः ॥ २० ॥

षोडशाक्षरम् ।

चमत्कारकरस्फारप्रभाप्राग्भारभासुरः ।
मनोरमतमक्रीडत्कान्तिमण्डलमण्डितः ॥ २१ ॥
मनोहरतर[1]स्फूर्जदूर्जस्वलकलोज्ज्वलः ।
अत्यद्भुतवपुर्लक्ष्मीक्षोभितक्षितिमण्डलः ॥ २२ ॥
मनोहारितरोच्छायकायच्छायचयान्वितः ।
प्रीतिस्फीतिकरप्रेङ्खत्प्रभासंहतिसंहतः ॥ २३ ॥
विस्फुरद्भ्रूभ्रमिविस्मेरविस्मयाविष्टविष्टपः[2] ।
नयनानन्दनोद्दामरामणीयकमन्दिरम् ॥ २४ ॥

अवनीतलवर्त्तिदृशाम्
अमृतांशुः सम्मदैककुलगेहम्[3] ।
चित्ताकर्षमहौषधिर्
अधिवासः कान्तिकेतक्याः ॥ २५ ॥

परिस्फुरत्कान्तिभरप्रचारकः
स्वपीडनेनापि परोपकारकः[1] ।
समीपभाजां हृदयैकहारकः
स्वभावसौन्दर्य्यविशेषभूषकः ॥ २६ ॥

जगत्प्रमोदोदयदानसज्जनः
शुभौघलक्ष्यप्रबलप्रशंसनः ।
नियन्त्रितानेकमनस्तुरङ्गमः
स्थिरीकृतालोककहृद्विहङ्गमः[2] ॥ २७ ॥

प्रमोदपात्रीकृतसर्व्वभूतलः
प्रतिक्षणाक्षीणगुणोर्म्मिशीतलः ।
समुल्लसद्दीधितिपुञ्जमञ्जुलः
समस्तचित्तोत्सवकृत्स्वभावतः ॥ २८ ॥

श्लोकत्रयेऽपि पादान्ताक्षरलोपेन छन्दोऽन्तरं ज्ञेयम् ।

अव्याजमाधुर्य्यसुधानिधानम्
मनोविहङ्गानयनैकपाशः[1] ॥ २९ ॥
निरवद्यसमुद्यदुज्ज्वल-
स्वगुणश्रेणिमनोहराकृतिः ।
त्रिजगज्जनचित्तचित्रकृ-
न्नयनानन्दसिताभ्रवर्त्तिका ॥ ३० ॥
अवनीतलवर्त्तिलोचना-
मृतवर्त्तिः प्रमदैकमन्दिरम् ।
घनविस्मयचित्रशालिका
हृदयाम्भोरुहभानुमण्डलः ॥ ३१ ॥
हृद्यतरद्युतिवारिपयोधि-
र्लोकविलोचन[1]शीतमयूखः ।
चारुतमापघनौघनिवेशो
भूवलयस्थितविस्मयहेतुः[2] ॥ ३२ ॥

मुख्यास्थानी सम्पदां सम्मदानां
लीलाशाला भाविता भाविताग्नैः ।
पुंसां नेत्रक्षेत्रपीयूषवृष्टि-
र्विश्वोद्दामाश्चर्यहर्म्यक्षशैलः ॥ ३३ ॥
उद्यदुज्ज्वलगुणौघमेदुरो
रामणीयकविलासमन्दिरम् ।
सुन्दरावयवसन्निवेशनं
कान्तकान्तिभरभासुराकृतिः ॥ ३४ ॥
गुणमणिप्रकरैकमहोदधिः
सकललोकविलोचनचन्द्रमाः ।
विलसदुज्ज्वलकान्तिनिकेतनम्
सहृदयौघचमत्कृतिकारणम् ॥ ३५ ॥
लसदङ्गरुचिप्रचयेन युतो

प्रभापूरदूरावधूतान्धकारः ।
मनोमीनहर्षप्रहर्षैकवर्षं
हृगम्भोरुहानन्दसन्दोहहेतुः ॥ ३७ ॥
अखिलजगदवेक्ष्यमाणलक्ष्मीः
स्वगुणविराजिभिरङ्गकैः प्रशस्यः ।
वसतिरतिवलक्षहंसपक्षप्रकर-
विजित्वरकीर्त्तिकौमुदीनाम्[१] ॥ ३८ ॥
निःशेषलोकपरितोषकरस्वरूपः
शोभान्वितावयवसुन्दरसन्निवेशः ।
दूरं निरस्तखलदुर्व्वचनावकाशो
व्याजृम्भमाणगुणसंग्रहणप्रवीणः ॥ ३९ ॥
प्रव्यक्ततत्तदखिलावयवानवद्यः
प्रोद्यन्निजोज्ज्वलगुणप्रकराभिरामः ।
आनन्दिभिः सहृदयैरभिनन्द्यमानः
स्वप्रक्रियाभिरभितश्च विराजमानः ॥ ४० ॥

कुतुकतरलचित्तैः सज्जनैः स्तूयमान
स्त्रिभुवनजननेत्रक्षेत्रपीयूषवर्षिः ।
प्रतिकलसमुदञ्चद्रूपसम्पन्निधानं
सकलमलविमुक्तः साधुवादेन युक्तः ॥ ४१ ॥

मुखरखरखलोक्तिध्वान्तविध्वंसनेन्दु-
र्विलसदमलकायव्यायतानन्तकान्तिः ।
अनणुगुणमणिश्रीश्रेणिविश्रामधाम
क्षपितसकलदोषः[1] सर्वसन्तोषहेतुः ॥ ४२ ॥

समुद्यत्प्रत्यङ्गप्रसृमरमनोज्ञद्युतिभरो
मनोमीनाकृष्टिप्रबलबडिशं काममृगयोः ।
घनाश्चर्यस्थानं जगति कुतुकोत्तानितदृशां
नराणामानन्दामृतलहरिदुग्धाम्बुधिरयम् ॥ ४३ ॥

उच्चैश्चेतोहरिणहरणाखर्वगन्धर्वगीतं
तत्तन्नेत्राबलिमधुलिहां माकरन्दः प्रवाहः ।

मधुरिमपरीपाकोद्रेकस्फुरद्द्युतिसुन्दरः ।
नयननलिनानन्दोल्लासग्रहाधिपमण्डलो
मिलदवयवश्रीरोचिष्णुर्निजान्वयभूषणम् ॥ ४५ ॥

लसद्घनरसच्छटानयनमीनयोर्जन्मिना-
मुदञ्चदतिसुन्दरप्रसृमरप्रभाभासुरः ।
अमन्दगुणमन्दिरं[1] सुभगतालतामण्डपः
समस्तजनविस्मयप्रदसमुल्लसत्स्वाकृतिः ॥ ४६ ॥

अवयवसन्निवेशजितसर्वमनोज्ञचयो
घनवसुधाजनेक्षणसुधारससेचनकम् ।
सहृदयमानसाम्बुजविजृम्भणतीक्ष्णकरो
द्युतिभरभासिताकृतितया[2]तिचमत्कृतिकृत् ॥ ४७ ॥

सर्वविद्यविनाकृतः कृतपरीरम्भः समस्तै[3]र्गुणै-
रानन्दैकनिदानमानदपतिक्ष्मावासिराशिस्तुतः[4] ।

(४५) मधुरिमपरिपाकोद्रेकः सौन्दर्य्यपरिणामातिशयः ।

उन्मीलन्निजकान्तिकैतकसमाकृष्टालिपुष्यन्धयो
विद्वन्मानसराजहंसविसरावासाय सौधं सरः ॥ ४८ ॥

सान्द्रानन्दसुधासमुद्रलहरीसाम्राज्यसम्यात्मभिः
सर्वैः सर्वकलाकलापकुशलैः साकाङ्क्षमुद्वीक्षितः ।
उद्यद्दृप्यतरोरुकान्तिपटलीविन्यासरम्याकृतिः
साधारण्यपदव्यतीतसहजोन्मीलत्तनुश्रीभरः ॥ ४९ ॥

अङ्गप्रत्यङ्गरङ्गत्प्रचुरतरमहाकान्तिभाराभिरामः
निर्व्याजभ्राजमानानणिमनिजगुणग्रामविश्रामधाम ।
लोकैरालोक्यमानः प्रमदजलपरिषिक्तनेत्रारविन्दैः
आनन्दस्यैकसौधं सकलवसुमतीमण्डलीसारभूतः ॥ ५० ॥

(४८) आनदपतिर्नदपतिः समुद्रस्तत्पर्यन्तं ये स्मावासिनो लोकाः । अलिपुष्पन्धयस्तु भ्रमरः ।

(४९) स एवं सुधासम्बन्धि सरः कासारः लहरी साम्राज्य ... असाधारणमित्यर्थः

एवं साधारणैः शब्दैरौचित्येन निवेशितैः ।
दक्षैश्छन्दःसु सर्वेषु कर्त्तव्यं पदयोजनम् ॥ ५१ ॥

अथ संस्कृतप्राकृतयोः समाः ।

अथोच्यन्ते मया केऽपि संस्कृतप्राकृते समाः ।
अन्यत्र वितताः शब्दा बालानां बुद्धिहेतवे ॥ ५२ ॥

अत्रादौ पुंलिङ्गाः ।

हाराहारविहारसारसरसाः[1] सम्भोगरोगासुराः
संहारासरवारवारणगणाष्टङ्कारतारारणाः[2] ।
लोलोल्लासविलासवायसहराहङ्कारहीराङ्कुराः
नीहारोरगरागतालतरलागोविन्दकन्दोदराः ॥ ५३

तरुणतरणिदासामोहसन्दोहभासाः[3]
खुरखरतरुघासा कासरारम्भहासाः ।
करकरिकिरिकीराः कोलकल्लोलधीरा

नरनरककरङ्का दण्डचण्डालरङ्काः
दरमरलकलङ्काः कम्बलाकारपङ्काः ।
खलवहलकुरङ्गा देहसन्देहसङ्गाः
परकुररतरङ्गाश्चार[1]सञ्चारभङ्गाः ॥ ५५ ॥
अरि-हरि-परिणाहाः कण्ठकुण्ठाहिदाहाः
परिसरझरहाहामञ्जुमञ्जीरवाहाः ।
अचलकुलकुमाराः कुम्भकुम्भीरमाराः[2]
विरलकवलजाराः सुन्दरोदारपाराः ॥ ५६ ॥
जम्बीरकेशरि[3]वराहमुरारिकालाः
काकोलकुन्तलचमूरुविरामवालाः ।
आरोह[4]राहुरणसङ्गरचोलतालाः
संसारकेरलसमीरणटङ्कभालाः ॥ ५७ ॥

(५५) करङ्को हस्तिपञ्जरः । कुररः पक्षिभेदः ।

(५६) परिणाहो विशालता । कण्ठो मन्दः । झरः प्रवाहः ।

आसारचामरतुरङ्गकुलीरशूराः
कङ्कालकन्दलकराञ्जलिलासपूराः ।
हेरम्बकम्बुविधुसिन्धुरधान्यबन्धाः
कुन्देन्दुमन्दरसमीरसमूहगन्धाः ॥ ५८ ॥

भीमाङ्कसङ्करकिरीटतमालकुञ्जाः ।
हिन्तालतोमरमहीरुहबिम्बपुञ्जाः ।
हिण्डीरपिण्डवरमञ्जरकोणकाणाः
संरम्भसोमपरिरम्भविकारवाणाः ॥ ५९ ॥

वसन्तासववेशन्तवासवावासवासराः ।
कासारसारसरसाः किरणारुणवारणाः ॥ ६० ॥

तालः शब्दभेदस्तरुभेदो वा । केरलो देशभेदः । टङ्कः पाषाण-
दारणः । भालो ललाटं ।

(५८) आसारो धारासम्पातः । कुलीरः कर्कटः । शूरः

एते पुंलिङ्गाः ।

हेला खेला कला माला रसाला काहला चला ।
कीला लीलाऽबला बालाऽलीलादोलालसा मसी ॥ ६१ ॥
धरणी धारणा गोणी रोहिणी रमणी मणी ।
वीणा वाणी रमा वेणी रीढ़ा गङ्गा तरङ्गिणी ॥ ६२ ॥
कदली लहरी नारी रामा भेरी वसुन्धरा ।
कालीकरालीचामुण्डारण्डारम्भातुलामही ॥ ६३ ॥

एते स्त्रीलिङ्गाः ।

जलफलपलमूलं वारि कीलालतूलं
वलपललदुकूलं लिङ्गगम्भीरकूलम् ।
सलिलकमलचीरं तुच्छराजीवनीरं
हलरजतकुटीरं दारुनालं पटीरम् ॥ ६४ ॥

(६१) रसाला पक्वान्नभेदः । काहला वाद्यभेदोऽचला पृथ्वी । कीला वह्निज्वाला । मसी कालिका ।

कारणं रोहणं वेलं कुहराम्बरमन्दिरम् ।
कुड्मलं मण्डलं तामरसं कुण्डलमङ्गदम् ॥ ६५ ॥
पुरारविन्दलोहाङ्कतड़ागं करणं कुलम् ।
तोरणं मरणं तुङ्गमानसागारभासुरम्[१] ॥ ६६ ॥

एते नपुंसकलिङ्गाः ।

भण गच्छ देहि संहर कुरु चोरय मारयावगच्छेहि ।
अवलोकयावचिन्तय खादेति धातुजं विद्धि ॥ ६७ ॥

अथ निरोष्ठ्याः ।

नीहारहारहरिणाङ्कहराट्टहास-
कैलासकासरदनारदसिंहसङ्घाः ।
शेषाहिहंसघनसारहरीन्द्रनाग-
डिण्डीरनिर्झर[१]शरद्घनचन्द्रकान्ताः ॥ ६८ ॥
शृङ्गारसागरतड़ागजड़ागयाग-
[illegible]दीक्षिताक्षाः ।

नाराचकाचकचकीचकचञ्चरीक-
चाणक्यचारणगणाङ्गणकाणशोणाः ॥ ६९ ॥
संसारसारसरसारिरसालशाल-
कङ्कालकालकलिशैलखलालकार्काः ।
किञ्जल्ककल्ककरशङ्करकीरहीर-
लङ्केशकेशगरकेशरहेमलेशाः ॥ ७० ॥
आनन्दनन्दनधनञ्जयखञ्जरीटाः
कीटाग्निकण्टककटाहकटाक्षयक्षाः ।
दक्षाक्षयक्षजनकाञ्जलियत्नयत्ना-
रत्नाकरान्धकधराधरधीरसीराः ॥ ७१ ॥

एते पुंलिङ्गाः ।

गङ्गा गीता सती सीता सिद्धिः सन्ध्या गया गदा ।
आशीः काशी निशा नासा कान्तिः शान्ति दशा रसा
॥ ७२ ॥

आर्द्रानिद्राहरिद्राहृद्गङ्गाशालाश्वाधृतिः क्षतिः ।
छायाजायाकथाकान्ताधात्री रात्री रतिर्गतिः[१] ॥ ७३ ॥
कन्धराधारणाधाराताराकाराजराधरा ।
आज्ञीराज्ञीरजन्यर्त्तिः कीर्त्तिः कन्या तटी नटी ॥ ७४ ॥
नारीसारीदरीदासीघटिकाखटिकाजटा ।
कक्षारक्षाशिखासंख्याकालिन्दीकलिकाकला ॥ ७५ ॥

एते स्त्रीलिङ्गाः ॥

चरणकरणचक्रं क्षेत्रनक्षत्रतक्रं
रजतशतशरीरं क्षीरनीराब्धितीरं ।
धनकनकनिधानं ध्यानसंस्थानदानं
नलिननगरगीतच्छत्रनेत्रास्थिगात्रम् ॥ ७६ ॥
आलिङ्गनस्नानशिरश्चरित्रं
जलस्थलस्थानकलत्रचित्रम् ।
कीलालजालालकनालदैन्यं

अदनं मदनं ज्ञानं निदानं दधि चन्दनं।
अम्बरं लक्षणं लक्ष्यं शस्त्रं शास्त्रं दलं हलम् ॥ ७९ ॥

एते नपुंसकलिङ्गाः ॥

आशास्तेऽस्ति चकास्ति निन्दति सृजत्याशंसति क्रीड़ति
ध्यायत्यर्चति याचते व्यतिहरत्याराध्यति चस्यति ।
शेते गच्छति यच्छतीच्छति नयत्यायाति हन्तीहते
ऽश्नाति स्नाति ददाति याति जयतीत्याद्याः क्रियाश्चिन्त-
येत् ॥ ८० ॥

इति प्रथमस्तवके सामान्यशब्दोनाम द्वितीयं कुसुमम् ॥०॥

अथ वर्ण्यानि कथ्यन्ते तानि यानि कवीश्वरैः ।
महाकाव्यप्रभृतिषु प्रबन्धेषु बबन्धिरे ॥ १ ॥

राजा राजवधूः पुरोहितकुमारामात्यसेनाधिपाः
देशो ग्रामपुरीसरोऽब्धिसरिदुद्यानाद्यरण्याश्रमाः ।
मन्त्रो दूतरणप्रयाणमृगयाश्वेभर्त्त्विन्दूदयाः
वीवाहो विरहस्वयम्बरसुरापुष्पाम्बुखेलारतम् ॥ २ ॥

नृपे कीर्त्तिः प्रतापाज्ञादुष्टशास्तिविवेकिताः ।
धर्म्मप्रयाणसंग्रामशास्त्राभ्यासनयक्षमाः ॥ ३ ॥

प्रजारागोऽरिशैलादिवासोऽरिपुरशून्यता ।
औदार्य्यधैर्य्यगाम्भीर्य्यशौर्य्यैश्वर्य्योद्यमादयः ॥ ४ ॥

(१) मृगयाश्वेभर्त्त्विन्दूदया इति मृगया च अश्वश्च इभश्च ऋतवश्च इन्दूदयौ च ते तथा । वीवाहइति उपसर्गस्य घञ्-मनुष्येभ्यो बहुलमिति दीर्घः, स्वयम्बरसुरापुष्पाम्बुखेलारतम् इति

देव्यां सौभाग्यलावण्यशीलशृङ्गारमन्मथाः ।
त्रपाचातुर्य्यदाक्षिण्यप्रेममानव्रतादयः ॥ ५ ॥

वेणीधम्मिल्लसीमन्तभालश्रवणनासिकं ।
कपोलाधरनेत्रभ्रूकटाक्षरदभाषणम् ॥ ६ ॥

गण्डबाहुकरोरोजनाभीमध्यवलित्रयं ।
रोमालिश्रोणिजङ्घोरुगतिक्रमनखंक्रमात् ॥ ७ ॥

पुरोहितो हितो वेदस्मृतिज्ञः सत्यवाक् शुचिः ।
ब्रह्मण्यो विमलाचारः प्रतिकर्त्तापदामृजुः ॥ ८ ॥

कुमारे शस्त्रशास्त्रश्रीकलाबलगुणोच्छ्रयाः ।
वात्यालीखुरलीराजभक्तिः सुभगतादयः ॥ ९ ॥

मन्त्री भक्तः शुचिः शूरोऽनुद्धतो बुद्धिमान् क्षमी ।
आन्वीक्षिक्यादिकुशलः परिच्छेदी स्वदेशजः ॥ १० ॥

देशे रत्नखनिद्रव्यपण्यधान्याकरोद्भवाः ।
दुर्गग्रामजनाधिक्यनदीमातृकतादयः ॥ १२ ॥
ग्रामे धान्यलतावृक्षसरसीपशुपुष्टयः ।
क्षेत्रावहट्टकेदारग्रामेयसुखविभ्रमाः ॥ १३ ॥
पुरेऽट्टपरिखावप्रप्रतोलीतोरणध्वजाः ।
प्रासादाध्वप्रपारामवापीवेश्यासतीत्वरी ॥ १४ ॥
सरस्यम्भो लहर्य्यम्भो गजाद्यम्बुजषट्पदाः ।
हंसचक्रादयस्तीरोद्यानस्त्रीपान्थकेलयः ॥ १५ ॥

(१२) नदीमातृकता नद्यम्बुपालितत्वं आदिशब्दाद्देव-मातृकता च ।

(१३) अवहट्टं हट्टं क्षुद्रविपणिस्थानं, ग्रामेयी नापित्यादि-स्त्री तस्याः सुखविभ्रमाः सुखविलासाः ।

अब्धौ द्वीपाद्रिरत्नोर्म्मिपोतयादो जलप्लवाः ।
विष्णुः कुल्यागमश्चन्द्रार्द्धिरौर्व्वोऽभ्रपूरणम् ॥ १६ ॥
सरित्यम्बुधियायित्वं नौच्यो जलगजादयः ।
पद्मानि षट्पदाहंसचक्राद्याः कूलशाखिनः ॥ १७ ॥
उद्याने सर्व्वसर्व्वफलपुष्पलताद्रुमाः ।
पिकालिकेलिहंसाद्याः क्रीड़ावाप्यध्वगस्थितिः ॥ १८ ॥
शैले मेघौषधीधातुवंशकिन्नरनिर्झराः ।
शृङ्गपादगुहारत्नवनजीवाद्युपत्यकाः ॥ १९ ॥

(१६) द्वीपाः सिंहलादयः अद्रयो मैनाकादयः, पोतो नौकाप्रभेदः, यादो जलजन्तुः, जलप्लवो जोयार इति ख्यातो जलप्रवाहः, जलशय्यागतो विष्णुः, कुल्या नदी, कुल्यमस्थि कुल्या-नीरप्रतोलिका तासामागमः प्रवेशः, और्व्वो वड़वानलः, अभ्रपूरणं मेघजलपूरणं ।

(१७) अम्बुधियायित्वं समुद्रप्रवेशः ।

[illegible] भिल्लम्लेच्छादयः ॥ २० ॥
आश्रमेऽतिथिपूजैणविश्वासो हिंस्रशान्तता ।
यज्ञधूमो मुनिसुता द्रुसेको वल्कलं द्रुमाः ॥ २१ ॥
मन्त्रे पञ्चाङ्गताशक्तिषाड्गुण्योपायसिद्धयः ।
उदया[1]श्चिन्तनीयाश्च स्थैर्यौन्नत्यादिसूक्तयः ॥ २२ ॥
दूते स्वस्वामितेजःश्रीविक्रमौन्नत्यकृद्वचः ।
शत्रुक्षोभकरी चेष्टा धार्ष्ट्यं दाक्ष्यमभीरुता ॥ २३ ॥

(२०) भिल्लम्लेच्छौ वनमानुषभेदौ ।

(२१) एणविश्वासो हरिणविश्रम्भः, हिंस्रशान्तता हिंस्राणां व्याघ्रादीनां शान्तता शशकादिभिः सिंहाद्यवस्थानात्, द्रुसेको द्रुमाणां सेचनं ।

(२२) पञ्चाङ्गानि विपत्प्रतीकारदेशकालविभागादयः, तिस्रः शक्तयः प्रभावोत्साहमन्त्रजाः, षड्गुणा एव षाड्गुण्यं सन्धिविग्रहयानासनादयः उपायाः सामदानभेददण्डाः, मन्त्रोत्साहप्रभावजास्तिस्रः सिद्धयः, सूक्तयः शोभनवचनानि ।

युद्धे तु वर्म्मवलचाररजांसितूर्य्य-
निस्वाननादशरमण्डपरक्तनद्यः ।
छिन्नातपत्ररथचामरकेतुकुन्त-
मुक्ताः सुरीवृतभटाः सुरपुष्पवृष्टिः ॥ २४ ॥

प्रयाणे भेरिनिस्वानभूकम्पवलधूलयः[१] ।
करभोक्षध्वजच्छत्रवाणशकटवेसराः ॥ २५ ॥

मृगयायां श्वसञ्चारो वागुरालीकवेधता[२] ।
भटहक्का[३]मृगत्रासः सिंहयुद्धं गतित्वरा ॥ २६ ॥

अश्ववेगित्वमौन्नत्यं तेजः सल्लक्षणस्थितिः ।
खुरात् खातरजोरूपं जातिर्गतिर्विचित्रता ॥ २७ ॥

(२४) युद्धकार्य्ये वर्म्म सन्नाहः, चारश्च गूढ़पुरुषः, तूर्य्यं वाद्यभाण्डं तस्य निस्वानो निनादः, नादः हेति-हननेत्यादिशब्दः सुरीदेवस्त्रीजनस्तेनवृता भटाः ।

(२५) ...

गजे सहस्रयोधित्वमुच्चत्वं कर्णचापलम् ।
अरिव्यूहविभेदित्वं कुम्भमुक्तामदालयः ॥ २८ ॥

सुरभौ दोला कोकिलमारुत-
स्तूर्य्यगतितरुदलोद्भेदाः ।
जातीतरपुष्पचयाम्रमञ्जरी
भ्रमरझङ्काराः ॥ २९ ॥

ग्रीष्मे पाटलमल्लीतापसरः
पथिकशोषवातोल्काः ।
सक्तुप्रपास्त्रीमृगतृष्णा-
म्रादिफलपाकाः ॥ ३० ॥

आवर्त्तरूपाणां प्रशस्तलक्षणानां स्थितिः, रूपं सौन्दर्य्यं, जातिः कौलिन्यं, गतिविचित्रता राधादिगमवैचित्रम् ।

(२८) सहस्रयोधित्वं सहस्रेण सार्द्धं युद्धक्षमत्वम्, उच्चत्वं औन्नत्यं, कर्णचापलं कर्णयोश्चाञ्चल्यं, अरिव्यूहविभेदित्वं अरीणां

वर्षासु घनशिखिस्मयहंसगमाः
पङ्ककन्दलोद्भेदौ[1] ।
जातीकदम्बकेतकझञ्झानिल-
निम्नगालिप्रीतिः ॥ ३१ ॥
शरदीन्दुरविपटुत्वं जलाच्छता-
गस्त्यहंसवृषदर्पाः ।
सप्तच्छदपद्मसिताभ्रधान्य-
शिखिपक्षमदपाताः ॥ ३२ ॥

अग्न्युत्पातः, प्रपा पानीयशालिका, प्रपास्थौ तद्वर्त्तिनौ मृग-तृष्णामरुमरीचिका ।

(३१) घनशिखिस्मयो घनो मेघः, शिखी मयूरो घन-मयूरयोः स्मयो गर्व्वः, हंसगमाः हंसगतं, हंसानां गमो मानससरः प्रतिगमनं, पङ्कः कर्द्दमः, कन्दलस्तृणभेदस्तयोरुद्भेद उद्गमश्च ।

हेमन्ते दिनलघुता शीतयवस्तम्ब-
मरुवका हिमानि ।
करीष[1]पुष्पधूपरिकुन्दाम्बुजदाह-
शिशिरोत्कर्षाः ॥ ३३ ॥

सूर्य्येऽरुणता रविमणिचक्राम्बुज-
पथिकलोचनप्रीतिः ।
तारेन्दुदीपकौषधि-
घूक[2]तमश्चौरकुमुदकुलटार्त्तिः ॥ ३४ ॥

चन्द्रे कुलटाचक्राम्बुजग्लानि-
र्विरहितमोर्त्तिरौज्ज्वल्यम् ।
जलधिजलनेत्रकैरवचकोर-
चन्द्राश्मदम्पतिप्रीतिः ॥ ३५ ॥

(३३) मरुवकं पुष्पभेदो मरुया इति ख्यातः, करीषं

विवाहे स्नानशुभ्राङ्ग[1]भूषोलूलुत्रयीरवाः ।
वेदीसङ्गीततारेक्षा लाजमङ्गलवर्त्तनम् ॥ ३६ ॥
विरहे तापनिःश्वासचिन्तामौनकृशाङ्गताः ।
अब्दसंख्या निशादैर्घ्यं जागरः शिशिरोष्णता ॥ ३७ ॥
स्वयम्बरे शचीरक्षामञ्चमण्डपसज्जनं[2] ।
राजपुत्रीनृपाकारान्वयचेष्टाप्रकाशनम् ॥ ३८ ॥
सुरापाने विकलता स्खलनं वचने गतौ ।
लज्जामानच्युतिः प्रेमाधिक्यं रक्ताक्षताभ्रमाः ॥ ३९ ॥

पुष्पावचये पुष्पावचयः
पुष्पार्पणार्थिता दयिते ।
माना गोत्रस्खलनेर्षा-
वक्रोक्तिसंभ्रमाश्लेषाः ॥ ४० ॥

(३६) शुभ्राङ्गः निर्मलाभ्यङ्गः, उलूलुर्जिह्वाध्वनिः, त्रयीरवः वेदध्वनिः, वेदी परिष्कृता भूमिः, तारेक्षा अरुन्धतीदर्शनं, लाजा

जलकेलौ सरःक्षोभश्चक्रहंसापसर्पणम् ।
पद्मम्लानिपयोविन्दुहृग्रागो भूषणच्युतिः ॥ ४१ ॥
सुरते सात्त्विका भावाः सीत्कारा: कुड्मलाक्षता ।
काञ्चीकङ्कणमञ्जीररावोऽधरनखक्षते[1] ॥ ४२ ॥
वर्ण्येषु वर्ण्यभावानां दिङ्मात्रमिह दर्शितम् ।
सुधीभिश्चिन्त्यमानानां भवत्येवमनन्तता ॥ ४३ ॥

विषये ईर्ष्या, सुरतादिनिमित्तं रहोनय नायकं प्रति नायिकाया इत्थमितोपि दूरे रमणीयं कुसुममारामं विचिनुव इत्यादि-वचनभङ्गी वक्रोक्तिः, भ्रमरादिझङ्कारं श्रुत्वा साध्वसच्छलेन नायकालिङ्गनं सम्भ्रमाश्लेषः ।

(४१) चक्रहंसापसर्पणं चक्रवाकहंसयोः पलायनं, दृग्रागश्चक्षु-र्लौहित्यं, भूषणच्युतिः भूषणानां वलयादीनां जले करताडि-कादिना च्युतिः पतनम् ।

(४२) सात्त्विक ाभावा सत्त्वोद्रेकभावा भावविकारास्तथाच [illegible] रोमाञ्चः गात्रहर्षोऽथ वेपथुः । वैवर्ण्यमश्रुप्रलय-

असतोऽपि निबन्धेन निबन्धेन सतोऽपि वा[१] ।
नियमेन च जात्यादेः कवीनां समयस्त्रिधा ॥ ४४ ॥

असतोऽपि निबन्धे यथा ;—

रत्नानि यत्र तत्राद्रौ[२] हंसाद्यल्पजलाशये ।
जलेभाद्यं नभोनद्यामम्भोजाद्यं नदीष्वपि ॥ ४५ ॥
तिमिरस्य तथा मुष्टिग्राह्यत्वं सूचिभेद्यता ।
अञ्जलिग्राह्यता कुम्भोपवाह्यत्वं शशित्विषः ॥ ४६ ॥
शुक्लत्वं कीर्त्तिहासादौ कार्ष्ण्यं चाकीर्त्तिपापयोः ।
प्रतापे रक्ततोष्णत्वे रक्तत्वं क्रोधरागयोः ॥ ४७ ॥

(४४) असतोऽपि वस्तुतोऽविद्यमानस्यापि सतोऽपि वस्तुतो विद्यमानस्यापि, जात्यादेर्जातिगुणक्रियाद्रव्यस्य समय आचारः सम्प्रदायक्रमः, तथाच समयः शपथाचारकालसिद्धान्तयुक्तिष्विति ।

(४५) यत्र तत्राद्रौ रोहणादिगिरेरन्यत्रापि गिरौ, अल्पजलाशये पल्वलादौ, जलेभाद्यं जलवारणादि, नभोनद्याम्

विभावर्य्यां भिन्नतटाश्रयणं चक्रवाकयोः ।
ज्योत्स्नापानं चकोराणां चतुष्कत्वं पयोनिधेः ॥ ४८ ॥

सतोऽप्यनिबन्धो यथा ;—

वसन्ते मालतीपुष्पं फलपुष्पे च चन्दने ।
अशोके च फलं ज्योत्स्नाध्वान्ते कृष्णान्यपक्षयोः ॥ ४९ ॥
कामिदन्तेषु कुन्दानां मुकुलेषु च रक्तता ।
हरितत्वं दिवा नीलोत्पलानाञ्च विकासिता ॥ ५० ॥
वर्णयेन्नसदप्येतन्नियमोऽथ प्रकाश्यते ।
भूर्जत्वग्घिमवत्येव मलये त्वेव चन्दनम् ॥ ५१ ॥
सामान्यग्रहणे शौक्ल्यं छत्राम्भःपुष्पवाससाम् ।
कृष्णत्वं केशकाकाहिपयोनिधिपयोमुचाम् ॥ ५२ ॥
रक्तत्वं रत्नबन्धूकबिम्बाम्भोजविवस्वताम् ।
तथा वसन्त एवान्यपुष्टानां कलकूजितम् ॥ ५३ ॥

(४८) विवर्ण्यं यदसदप्येतद् इत्यत्र चतुष्कत्वं पयोनिधेः ।

वर्षास्वेव मयूराणां कृतं नृत्यं च वर्णयेत् ।
नियमस्य विशेषोऽथ पुनः कश्चित् प्रकाश्यते ॥ ५४ ।

कमलासम्पदोः कृष्णाद्धरितोर्नागसर्पयोः ।
पीतलोहितयोः स्वर्णपरागाग्निशिखादिषु ॥ ५५ ॥

चन्द्रे शशैणयोः कामध्वजे मकरमत्स्ययोः ।
दानवासुरदैत्यानामैक्यमेवाभिसम्मतम् ॥ ५६ ॥

बहुकालजन्मनोऽपि शिवचन्द्रस्य बालता ।
मानवा मौलितो वर्ण्या दैवाश्चरणतः पुनः ॥ ५७ ॥

इति प्रथमस्तवके वर्ण्यस्थितिर्नाम
तृतीयं कुसुमम् ॥

अथ कथादिके राजवर्णनाद्युपयोगिनः ।
अनुप्रासस्य सिद्ध्यर्थं[1] वर्णान् कतिपयान् ब्रुवे ॥ १ ॥

वर्णानामनुवृत्तिर्या नातिदूरान्तरस्थितिः ।
अनुप्रासः स तेनैव सनाथा काव्यपद्धतिः ॥ २ ॥

गतालङ्कारशङ्कोऽपि काव्यबन्धो विराजते ।
वर्णाः सद्योऽर्णवोद्गीर्णसुधाविस्पर्द्धिनो[2] यदि ॥ ३ ॥

मृगनाभिसनाभिश्रीः श्रीकण्ठाकुण्ठकण्ठरुक् ।
सतो यतो यदच्छायो घनाघनघनद्युतिः ॥ ४ ॥

स्वर्धुनी ते धुनी तेऽघं निर्यन्निर्जरनिर्झरा ।
मेदुरापा दुरापात्वामक्षता रक्षतात् क्षतात् ॥ ५ ॥

(१) अथ कथादिके आख्यायिकादौ प्रस्तुतकथास्तवके वा ।

(२) अनुवृत्तिः पश्चाद्वृत्तिः, अनु पश्चात् प्रकर्षेण आस्वनं क्षेप इति कृत्वा ।

अर्य्यमावर्य्यमाहात्म्यः कोकशोकावमोकक्षत् ।
कीनाशभीनाशकरः प्रवालप्रललच्छविः ॥ ६ ॥
घनाभोगे नभोगे त्वां सेवते दैवतेश्वरः ।
वन्देऽहं गतसन्देहं विमलं कमलं तव ॥ ७ ॥
स्फुर्जद्धूर्जटिसङ्काशः कोपे गोपतिकेतनः[1] ।
वैरिमर्दी कपर्दी च निस्तन्द्रश्चन्द्रचूड़वत् ॥ ८ ॥
रणे गणेशसंकाशो गतार्त्तिः कार्त्तिकेयवत् ।
श्रीमान् रामाभिरामश्रीः स त्रिविक्रमविक्रमः ॥ ९ ॥
विश्वरूपसरूपश्रीः[2] क्रतुपूरुषपौरुषः ।
श्रीवत्सलाञ्छनच्छायो धरणीधरदुर्द्धरः ॥ १० ॥

स्निग्धजला अः समासान्तः, दूरापा दुष्प्रापा त्वां क्षतात् क्षयात् रक्षतात् रक्षतु, कीदृशी अक्षता न विद्यते क्षतं क्षयो यस्याः सा ।

(६) अर्य्यमा सूर्य्यः, कोकश्चक्रवाकः, कीनाशो यमः, तस्मात् या भीस्तस्य नाशकरः प्रवालो विद्रुमः, नवपल्लवे ।

(७) नभोगे गङ्गे घनाभोगे घनो निविड़ आभोगः परिपूर्णता

विष्टरश्रवसाविष्टश्छद्मना पद्मनाभवत् ।
रराज राजराजश्रीः पितामहमहा महान् ॥ ११ ॥

कश्चित् दुश्च्यवनप्रायः पाकशासनशासनः ।
श्रीमानिन्द्र इवोन्निद्रः समन्युः शतमन्युवत् ॥ १२ ॥

निविड़ौजा विड़ोजोवदनघो मघवानिव ।
जम्भदम्भजिदारम्भः प्रत्यूहव्यूहवर्ज्जितः ॥ १३ ॥

महीमहीयान् संसारसारः शक्रपराक्रमः ।
सङ्कल्पकल्पवृक्षश्रीः प्रज्ञावज्ञातवाग्पतिः ॥ १४ ॥

(११) विष्टरश्रवसा कृष्णेण विष्टः कृतावेशश्छद्मना कैतवेन, राजानो यक्षास्तेषां राजा कुवेरः तद्वत् श्रीर्यस्य, पितामहो ब्रह्मा तद्वन्महस्तेजो यस्य ।

श्रीरङ्गरङ्गदङ्गश्रीर्विलिखालिखलीढ्ली ।
नयज्ञयज्ञपुरुषः शिपिविष्टनिविष्टधीः ॥ १५ ॥
स्मरघस्मरसङ्काशो भाग्यसौभाग्यभाग्यसौ ।
धुर्य्यमाधुर्य्यसारश्रीः कुशली मुषली यथा ॥ १६ ॥
रुचिरो रुचिरोचिष्णुः क्षमया क्षमया समः ।
कासुसंकाशसत्कीर्त्तिः सर्व्वदा सर्व्वकामकृत् ॥ १७ ॥
प्रीणाति प्राणिनामेष मनोहरमनोहरः ।
महादेवमहादेवः करुणावरुणालयः ॥ १८ ॥
तनयो विनयोपेतः केतकश्वेतकीर्त्तिमान् ।
राजते राजतेजोभिः कविराजिविराजितः ॥ १९ ॥

(१५) श्रीरङ्गः कृष्णस्तद्वत् रङ्गन्तौ उद्यन्तौ अथवा श्रीः शोभा रङ्गः खेला ताभ्यां रङ्गन्तौ अङ्गश्रीर्यस्य, शिपिविष्टः कृष्णः ।

(१६) स्मरस्य घस्मरो भक्षको महादेवः, भाग्यसौभाग्ययोर्भागोऽस्यास्तीति स तथा धूर्य्यो धुरीणः तस्य यन्माधुर्य्यं लावण्यं

उद्दामधामकामश्रीधर्म्मकर्म्माणि शर्म्मभाक् ॥ २० ॥

भूखण्डाखण्डलः काण्डचण्डकोदण्डपण्डितः ।
प्रचण्डकुण्डलोद्दण्डगण्डमण्डलमण्डितः ॥ २१ ॥

सन्निधानं निधानं तेऽकरवं नरवन्दितः ।
नितरां वितराम्बूनि राजसे राजसेवक ॥ २२ ॥

हारमणी रमणीया नाकनायकनायिका ।
भाविता भावितानेन कलिता ललितालकैः ॥ २३ ॥

(२०) मणिश्च द्युमणिः सूर्य्यश्च तद्वद्दुष्प्रेक्ष्यो दुर्दर्शः, शर्म्म सुखं भजते इति शर्म्मभाक् भजो ण्विः ।

(२१) भूखण्डाखण्डलः भूमीन्द्रः काण्डेन शरेण चण्डः कोदण्डः धनुस्तत्र पण्डितः ।

(२२) सन्निधानं सान्निध्यं, निधानं धनं, अकरवं करोमि स्म नितरामतिशयेन अम्बूनि वितर देहि ।

कान्ता कान्तालकान्तासौ श्रेयसी प्रेयसी भ्रूशम् ।
कन्दः कन्दर्पदर्पस्य पाटलापाटलाधरा ॥ २४ ॥
खर्वीकृतोर्वशीगर्वा निर्वासितरतिद्युतिः ।
रमणी रमणीयासौ सुमनस्सुमनःस्मिता ॥ २५ ॥
शवरी कवरीरम्या प्रवराः शवरास्तथा ।
सर्वतः पर्वतः श्रीमानधुनामधुना मतम्[1] ॥ २६ ॥
बुधा मुधा सुधाबुद्धिर्मुग्धा मुग्धाधरेऽधरे ।
सारवं सारवं तोयं रुचिरं सुचिरं न किम् ॥ २७ ॥
अमुना यमुनातीरे शैशवं कैशवं पुरा ।
स्फुरदक्षेण दक्षेण स्फुटं दृष्टमदृष्टतः ॥ २८ ॥

(२४) कन्दो मूलं पाटला पाटलपुष्पं तद्वत् पाटलो लोहितो ऽधरो यस्याः सा ।

(२५) तथा निर्व्वासिता दूरीकृता रतेः कामपत्न्या द्युतिः सौन्दर्य्यं यया, सुमनसो देवास्तेषां पुष्पं पारिजातं तद्वत् स्मितं

उग्रोग्रो गिरिगिरिशः शम्भुशोभाच्युताच्युतः ।
कृष्णकृष्णो हृद्यविद्यः सूर्य्यशौर्य्यो रविच्छविः ॥ २९ ॥
भीमभीमो रुद्ररौद्रो धामधाममहामहाः ।
मेधावेधा जिष्णुजिष्णुः शूरशूरो ध्रुवध्रुवः ॥ ३० ॥
देवदेवकालकालभीमभीमरामराम ।
सारसारधामधाममांसमांसरक्षोरक्ष ॥ ३१ ॥

अरुणारुणार्कपिङ्गपिशः
सदावदातविसर्विशदोऽभी ।
उन्मीलन्ती लक्ष्मीः[1]
परितो हरितो निकामतः श्यामः ॥ ३२ ॥

(२९) उग्रो हरस्तद्वदुग्रः क्रूरः, गिरि वाण्यां गिरिश इव गिरि गिरिशः, अच्युतवत् कृष्णवत् अच्युतः ।

(३०) भीमः शिवस्तद्वत् भीमः भयङ्करः, धाम्नि तेजसि धाम गृहं, महत् महो यस्य, मेधायां वेधा इव, जिष्णुरिन्द्रो

नरा न राजन्ति सखे सखेदाः
प्रभा प्रभातेव कृशा कृशानोः।
वामोरु वामो रुषितो विधाता
मुक्तासि मुक्तासितकीर्त्तिना त्वम् ॥ ३३ ॥

स्वःसिन्धुतीरेऽघविघातवीरे
लसत्समीरे करलभ्यनीरे।
वसन् कुटीरे परिधाय चीरे
करोम्यधीरे न रुचिं शरीरे ॥ ३४ ॥

आनन्दतुन्दिलपुरन्दरमन्दमुक्त-
मन्दारदाममकरन्दकरम्बिताङ्गीं।

(३३) हे सखे! सखेदा दुःखिता नरा न राजन्ति न शोभन्ते, कृशानोरग्नेः प्रभा प्रभातेव प्रातरिव दुवार्थे वकारः। हे वामोरु!

गङ्गामनङ्गरिपुतुङ्गतमोत्तमाङ्ग-
केशग्रहग्रहिलवीचिभुजां भजामि[1] ॥ ३५ ॥

इत्यमर्त्त्यनृपामात्ययुवत्याद्युपवर्णनैः ।
शब्दान् पश्येद्[2] यथौचित्यं क्षिप्रानुप्राससिद्धये ॥ ३६ ॥
अथानुप्राससिद्ध्यर्थ[3]मुपायान्तरमुच्यते ।
आदिक्षान्तलिपौ कादिक्षान्तशब्दगवेषणम् ।
चित्रानुप्रास-यमक-शब्दनिश्चयकृद् भवेत् ॥ ३७ ॥
यथा कलं खलं गलं चलं छलं जलं तलं ।
स्थलं दलं नलं पलं फलं बलं मलं हलं ॥

माङ्गं शिरस्तस्य केशग्रहग्रहिला आसक्ता वीचिरेव भुजो यस्यास्तां तया । अन्योऽपि तुङ्गस्थानात् पतनभीत्या भुजेन किञ्चिदवलम्बते ।

(३७) आदिक्षान्तेत्यादि अकारो वर्ण आदिर्यस्याः क्षकारो वर्णोऽन्तो यस्याः सादिक्षान्ता एवम्भूता या लिपिः पञ्चाशद्वर्णा-

कौरं चौरं जौरं तौरं धौरं नौरं वौरं सौरं हौरं क्षौरं । ९५ । एवमन्यच्चापि ।

यत्किञ्चिदत्र न मया गदितं
ग्रन्थस्य गौरवत्रासात् ।
मत्कृतचन्द्रकलापे[1]
ऽमलमतिभि[2]स्तद्बुधैर्ज्ञेयम् ॥ ३८ ॥

इति कविकल्पलतायां प्रथमस्तवके अनुप्रासो नाम चतुर्थं कुसुमम् ।

समाप्तः प्रथमस्तवकः ॥

अथ श्लेषस्तवकः ।

उद्दिष्टवर्णनं वर्णः प्रकीर्णं संख्यया सह ।
रूढादिश्चेति पञ्चेह कुसुमानि यथाक्रमम् ॥ १ ॥

श्वैत्यादिभिर्विभिन्नस्योद्दिष्टवस्तुद्वयस्य यत् ।
अभेदः क्रियते श्लेषात्तस्मादुद्दिष्टवर्णनम् ॥ २ ॥

सितकृष्णौ विधुहरी
शितितारा‌भ्रकनागराजघनसाराः ।
रामपयोराश्यर्जुन-
सिंहौजानन्तचन्द्रहासाद्याः ॥ ३ ॥

शङ्करतारकेश-
सदाकाशव्योमकेशतालाङ्काः ।

(३) विधुश्चन्द्रो विष्णुश्च । हरिः कृष्णः सिंहश्च । शिती धवल-मेचकौ । तारा नक्षत्रम् अक्ष्णः कनीनिका च । अभ्रकं गिरिज-

नीलांशुकोऽधिकेशो
ऽरिष्टः सदासिचयकलकण्ठाः ॥ ४ ॥

हरिजिष्णुघनाब्धिभ्यो गजाः सिन्धुर्मुरारितः ।
अम्बुवाहोऽञ्जनि कृष्णाद् यमुना कुम्भितोद्विपः ॥ ५ ॥

कृष्णार्थाद्यात्तटिनीवाचकशब्दात्
परं वर्गो योज्यः ।
नीरदघनोपलसितसदा-
हिमकरसिन्धुवेणीपृथुलाभाः ॥ ६ ॥

बलभद्रः कृष्णकान्तिश्च । अधिकेशः अधिकशिरः अधिकबालश्च । अरिष्टं तक्रं । काकश्चारिष्टः । सदा सिचयः सिचयो वस्त्रं असिचयः खड्गसमूहश्च । कलकण्ठो हंसः पिकश्च । पिके पारावते हंसे कलकण्ठः कलध्वनौ ।

(५) शुक्लश्यामाभिधायका भवन्तीति शेषः । हरिगज ऐरावतः । एवं जिष्णुगजो घनगजोऽब्धिगजश्च । पक्षे हरिर्विष्णुर्गजो

वहन् कलभवच्छायामन्धकारातिदीधितिः ।
सदाधिकेशवच्छायोऽनेकपायममच्छविः ॥ ७ ॥

वपुर्महोदधिच्छायं बिभ्रत् सैन्धवकान्तिमान् ।
स्फटिकाचलसच्छ्रीः स्पष्टांशुकरुचिं वहन् ॥ ८ ॥

धौताम्बरश्रियं धत्ते स्फटिकान्तश्रियान्वितः ।
अर्जुनद्युतिविद्योतीत्येवमादि समुन्नयेत् ॥ ९ ॥

रक्तश्वेतौ हरिशुचि-
पुष्करसितपद्मसूर्यकान्ताब्जाः ।
नवहंसमहापद्मार्कसोदराः
कमलकीलाले ॥ १० ॥

मेघश्च । घनोपलसितः । घनोपलः करका तद्वत् सितः । घनो
मेघः तद्वदुपलः सितः कान्तः । दाडिमकरः चन्द्रः सर्पसकरौ

जलेभ्यो जन्मशोभाभिः सरोजकुमुदारिभिः ॥ ११ ॥

सूर्य्योपलसितद्युतिः

पीतश्वेतौ गौरद्विजराजकपर्द्दशम्भुहरिताक्ष्याः ।

हैमस्तोमाष्टापदमहारजत-

चन्द्रकलधौताः ॥ १२ ॥

(११) भानोः परस्मात् सुहृद्रत्नादिभिः मतरत्नौ । यथा रविमित्रं चन्द्रः रवितुल्यश्च । भानुरत्नं सूर्य्यकान्तः रविपद्मरागौ च । अग्निरत्नं सूर्य्यकान्तोऽग्निपद्मरागौ च । रदांशुकं दन्तवस्त्रेऽधरे च । जलजशोभा जलजाचासौ शोभा चेति पद्मकान्तिश्च । एवं सरोजारिशोभा सरोजस्पर्द्धिनी शोभा पक्षे सरोजारिश्चन्द्रः । कुमुदारिशोभा कुमुदस्पर्द्धिनी शोभा पक्षे कुमुदारिरादित्यः ।

(१२) गौरः पीतसितयोः । द्विजराजो गरुड़चन्द्रयोः ।

सुशोभितारकूटश्रीः स्वर्णस्तोमसमद्युतिः।
दृहनोपलसत्कान्तिर्गाङ्गेयद्युतिपेशलः[२] ॥ १३ ॥
कमलाधिपपद्मेशौ नागजित् सूर्य्यभूस्तथा।
रत्नाकरवरश्रीकः सदाधिकमलद्युतिः ॥ १४ ॥
सदा सिन्दूरमुज्ज्वेता कलयन् नलिनश्रियम्।
स्फुटशोभनताम्रश्रीर्वराहस्वामिदीधितिः ॥ १५ ॥

(१३) तारकूटो रौप्यसमूहः पक्षे आरकूटो रीतिः। [गोपति-तार्क्ष्यकान्तिः रविगरुड्च्छविः पक्षे गोपतिरिन्द्रस्तस्य तार्क्ष्यस्तुरङ्गः। वामदेवगिरिः मनोज्ञमेरुः कैलासश्च। लोहितनीलौ पुष्कर हरिविद्रुमकमलकृष्णरत्नानि। सिन्दूरभूषणोत्पलधनञ्जयाभोगि-नोपलाशानि। पुष्करं पद्माकाशयोः। हरिः सूर्य्यकृष्णयोः। विद्रुमः प्रवालविशिष्टवृक्षयोः। कमलं जलमलपद्मयोः। कृष्णरत्नं कौस्तु-भेन्द्रनीलयोः। सिन्दूरभूषणं सिन्दूरालङ्कारगजयोः। उत्पल-

सुसम्पन्नमुखप्रभो विद्रुममणिदीधितिः ।
प्रवालप्रबलच्छायः कलभानुमितच्छविः ॥ १६ ॥

कलं कमलवद्वपुर्वहन्
पीतश्यामौ कृष्णाम्बरमधुजिद्ध्वान्तजेतारः ।
विद्युत्कान्तध्वान्तद्वेषि-
हरिस्वर्णवच्छायाः ॥ १७ ॥

(१६) प्रवालः प्रकृष्टो बालः केशः पक्षे विद्रुमः, कलभः करिशावकस्तद्वदनुमिताच्छविरस्य पक्षे कला शोभना भानुना सूर्य्येण मिता उपमिता छविरस्येति ।

(१७) कलं शोभनं कमलवत् पक्षे कलङ्कमणौ तयोरिव । कृष्णस्याम्बरं पीतवासः, कृष्णोऽम्बरमाकाशश्च । मधुजित् मधुस्पर्द्धी कृष्णश्च । ध्वान्तजेता ध्वान्तस्पर्द्धी सूर्य्यश्च । विद्युत्कान्तो मेघो विद्युत्कमनीयश्च । ध्वान्तद्वेषी ध्वान्तस्पर्द्धी सूर्य्यश्च । हरिःकृष्णः सूर्य्यश्च । स्वर्णवत् कनकवत् छाया यस्य पक्षे शोभना [illegible]

सुधांशूच्चैःश्रवः शम्भुकीर्त्तिज्योत्स्नाशरद्घनाः ।
प्रासादसौधतगरमन्दारद्रुहिमाद्रयः ॥ १ ॥
सूर्य्येन्दुकान्तकर्पूरकरम्भा रजतं हली ।
निर्म्मोकभस्महिण्डीर[1]चन्दनं करका हिमम् ॥ २ ॥
हारोर्णनाभतन्त्वस्थिस्वर्गण्डेभरदाभ्रकम्[2] ।
शेषाहिः शर्करा दुग्धं दधिगङ्गासुधाजलम् ॥ ३ ॥
मृणालसिकताहंसवककैरवचामरम् ।
रम्भागर्भः पुण्डरीकं केतकीशङ्खनिर्झराः ॥ ४ ॥

(१) अथ श्वेतानीति तगरं पुष्पभेदे । मन्दारद्रुर्मन्दारनामा स्वस्तरुः हिमाद्रिर्हिमालयः ।

(२) सूर्य्यकान्तचन्द्रकान्तौ मणिभेदौ, करम्भा दधिशक्तवः हली बलभद्रः, निर्म्मोकः सर्पगात्रमुक्तकञ्चुकः, हिण्डीरोऽब्धिफेनः करका वर्षोपलः ।

(३) ऊर्णनाभकः मर्कटकम्, अस्थि कीकसं, स्वः स्वर्ग-

लोध्रसिंहध्वजच्छत्रचूर्णशुक्तिकपर्दकाः ।
मुक्ताकुसुमनक्षत्रदन्तपुण्योशनोगुणाः ॥ ५ ॥
कैलासकाशकार्पासहासवासवकुञ्जराः ।
नारदः पारदः कुन्दः खटिका स्फटिकादयः ॥ ६ ॥
कृष्णानि केशवः सीरिचीरचन्द्राङ्कराहवः ।
विन्ध्याञ्जनाद्रिऋक्षाहिवनभैरवराक्षसाः[1] ॥ ७ ॥
शितिकण्ठघनद्वैपायनरामधनञ्जयाः ।
शनिद्रुपदजाकालीकलिकोलयमासुराः ॥ ८ ॥

(५) लोध्रो वृक्षभेदः, चूर्णः क्षोदः, शुक्तिर्मुक्तास्फोटः, कपर्दको वराटः, उशनाः शुक्रः, गुणाः सत्त्वविनयनयादयः ।

(६) वासवकुञ्जर ऐरावतः, पारदो रसः, खटिका कठिनी, आदिशब्दात् हरदुग्धदधिसरस्वत्यगस्त्यसत्त्वगुणप्रभृतयः ।

(७) सीरी बलभद्रश्चीरं तस्य वस्त्रम्, अहिः सर्पः, वनमरण्यं,

केशकज्जलकस्तूरीराजपट्टविदूरजम् ।
विषाकाशकुहूशस्त्रागुरुपापतमोनिशाः ॥ ९ ॥
मसीपङ्कमदाम्भोधियमुनाधूमकोकिलाः ।
गोलाङ्गुलास्यगुञ्जास्यकाकखञ्जनकेकिनः[1] ॥ १० ॥
गवलं तालतापिच्छतिलेन्दीवरवल्लयः ।
रसावद्भुतशृङ्गारौ कटाक्षोऽलिः कनीनिका ॥ ११ ॥
नीलौ जम्बूफलं मुस्ता काच[2]कृत्याकुकीर्त्तयः ।
भिल्लच्छाया गजाङ्गारखलान्तःकरणादयः ॥ १२ ॥

(९) राजपट्टं कानि-चरणीतिख्यातं वासः, विदूरजं मणिभेदः, विषं गरलं, कुहूरमावस्या, शस्त्री कृपाणः, अगुरुर्गन्धभेदः, तमो ध्वान्तं तमोगुणो वा ।

(१०) मसी कालिका, मदो दन्तिनां दानजलं, गोलाङ्गुलो वानरभेदस्तस्यास्यं मुखं, गुञ्जाफलस्य [आस्यं] मुखम् ।

नीलानि शुकशैवालदूर्व्वाबालतृणं बुधः ।
वंशाङ्कुरो मरकतेन्द्रनीलार्कहयादयः ॥ १३ ॥
शोणानि भौमतीक्ष्णांशुताम्रकुङ्कुमतक्षकाः ।
गुञ्जेन्द्रगोपखद्योतविद्युत्कृञ्जरबिन्दवः ॥ १४ ॥
दृगन्ताधरजिह्वासृङ्मांससिन्दूरधातवः ।
हिङ्गुलं कुक्कुटशिखा तेजः सारसमस्तकम् ॥ १५ ॥
माणिक्यं हंसचञ्चवङ्घ्रि शुकमर्कटयोर्मुखम् ।
चकोरकोकिलापारावतनेत्रनखामयः[१] ॥ १६ ॥
कुङ्कुमकिंशुकाशोकजवाबन्धुकपाटलाः ।
कमलं दाड़िमीपुष्पं विम्बं किम्पाकपल्लवौ ॥ १७ ॥

(१३) बुधो रौहिणेयः, वंशाङ्कुरः करीरं, मरकतेन्द्रनील
त्पलभेदौ, अर्कहयः सूर्य्यघोटकः आदिशब्दादतसीकलायकुम
मादयः ।

(१४) भौमः मङ्गलः, तक्षको नागभेदः, इन्द्रगोपः कापा

ताम्बूलरागो मञ्जिष्ठालक्तकं रक्तचन्दनम् ।
त्रेता नखक्षतं क्षत्रधर्म्मरौद्ररसादयः ॥ १८ ॥
पीतानि ब्रह्मजीवेन्द्रगरुडेश्वरदृग्जटाः ।
गौरौ द्वापरगोमूत्रमधुवीररसा रजः[१] ॥ १९ ॥
हरिद्रा रोचना रीतिगन्धके दीपचम्पके ।
किञ्जल्कवल्कले शालिहरितालमनःशिलाः ॥ २० ॥
कर्णिकारं चक्रवाकवानरौ सारिकापदम्[२] ।
केशवांशुकमण्डूकपरागकनकादयः ॥ २१ ॥

(१८) त्रेता द्वितीयं युगं, नखक्षतं नखाघातः, क्षत्रः क्षत्रिय-जातिः, तद्धर्म्मस्तज्जातिगुणः ।

(१९) जीवो बृहस्पतिः, ईश्वरः शिवस्तस्यदृशो नेत्राणि, जटा कपर्द्दः, द्वापरस्तृतीयं युगम्, रजः रजोनामगुणः ।

धूसराणि रजोधूताकरभो गृहगोधिका ।
कपोतमूषिकोरङ्काककण्ठखरादयः ॥ २२ ॥

उपमेयस्य शोभातिशयख्यापनाय कयापि युक्त्या विशेष
रलङ्कृतमुपमानं कुर्वीत । तद्यथा ;—

सुरनिकरकराग्रव्यग्रमन्थानशैल-
क्षुभिततरलदुग्धाम्भोधिकल्लोलकान्तिः ।
तुहिनगिरितनूजानम्रभूतेशचूडा-
गलितगगनगङ्गाधौतशीतांशुगौरः ॥ २३ ॥
हिमकिरणमरीचिव्यूहविभ्राजमान-
क्षितिधरपतिचूडाजाह्नवीकल्पकान्तिः ।
गिरिशमुकुटचन्द्रज्योतिरुद्योतमान-
स्फटिकशिखरिशृङ्गस्पर्द्धमानाङ्गकान्तिः ॥ २४

इति श्वेतानि ।

मुकुटगलितगङ्गानीरकल्लोलमाला-

दिनपरिवृढ़पुत्रीगर्भनीलारविन्द-
भ्रमरमधुपालीपक्षतिप्रख्यलक्ष्मीः ।
जलशयनशरीरस्फाररोचिः प्रपञ्च-
च्छुरितसरिदधीशभ्राजमानाङ्गयष्टिः ॥ २६ ॥

इति कृष्णम् ।

मसृणघुसृणपङ्काभ्यङ्गचञ्चन्मृगाक्षी-
कुचकलशपिधानोद्दामकौसुम्भकान्तिः ।
तरुणतरणिकान्तिव्रातसंसर्गरज्यत्-
कमलदलनिकायप्रायकायप्रभोर्म्मिः ॥ २७ ॥
अभिनवरविरश्मिद्योतितप्राच्यभूभृ-
च्छिखरलसदशोकस्मेरपुष्पोपमानः ।

(२६) दिनपरिवृढ़ः सूर्य्यस्तत्पुत्री यमुना, "पक्षतिः पक्षमूले स्यात" जलशयनः कृष्णः, प्रपञ्चो वि ारः, छुरितो मिश्रितः,

परिकुपितमृगाक्षीलोचनप्रान्तरोचि-
ष्फुरितकमलकान्तोत्तंससङ्काशकान्तिः ॥ २८ ॥

इति रत्नम् ।

मधुरिपुपदनिर्यज्जाह्नवीवारिपूर-
स्नपितगरुडपक्षप्रख्यसंलक्ष्यकान्तिः ।
तरुणकिरणमालिस्फूर्जदंशुप्रवाह-
स्मितकनकसरोजव्यूहतुल्याङ्गकान्तिः ॥ २९ ॥
जलधरनिकुरम्बोद्दामधारानिपात
स्नपितकनकशैलस्पर्द्धिवर्द्धिष्णुकान्तिः ।
तरुणतरमृगाक्षीगण्डरोचिः प्रपञ्च-
स्फुरितकनककर्णोत्तंससङ्काशकान्तिः ॥ ३० ॥

अमरनिकरयाच्ञाविस्फुरत्कामधेनु-
स्तनगलितपयोवद् भारती भाति यस्य ।
हिमकिरणमयूखव्रातभिन्नेन्दुकान्त-
प्रसरदमृततुल्या यस्य वाचो विभान्ति ॥ ३१ ॥
दनुतनुजविपक्षक्षुब्धदुग्धाब्धिगर्भो
ल्लसदमृतसमाना रेजिरे यस्य वाचः ।
मदनदहनचूडाचन्द्ररोचिष्णुगङ्गा-
लहरिभरसनाभिः शोभते यस्य वाणी ॥ ३२ ॥

(३१) भिन्नः सङ्गतः इन्दुकान्तश्चन्द्रकान्तश्चन्द्रमणिः ।

(३२) क्षुब्धः क्षोभं दधातीति अन्यथा इटि क्षोभित इति स्यात्, मदनो मनोहरः, सनाभिः सदृशो ।

इति द्वितीयस्तवके वर्ण्यवर्णनं नाम

सम्पूर्णगर्भवृत्तानि मुखपद्मेन्दुदर्पणाः ।
चक्रावहट्टतिलकमृदङ्गपुटशाणकाः ॥ १ ॥
आवर्त्तकमठौ लूतागृहच्छत्रमपूपकम् ।
आलवालमहीजालचर्म्मकं स्थालकादयः ॥ २ ॥
वृत्तानि वाहनारङ्गस्कन्धधम्मिल्लमोदकाः ।
रथाङ्गलावककुद कुम्भिकुम्भाण्डकादयः ॥ ३ ॥
कर्णपाशभुजापाशाक्षणाच्चापघटाननम् ।
मुद्रिकापरिखायोगपट्टहारस्रगादयः ॥ ४ ॥

(१) सम्पूर्णं निःसम्पूर्णो गर्भोऽभ्यन्तरं येषां एवंभूतानि वर्त्तुलानि वस्तून्यभिधीयन्ते, मुखपद्मेत्यादि वक्रं यथावय[व]स्य चक्रास्त्रं वा अवहट्टं क्षुद्रविपणिः, शाणकमस्त्राणामुत्तेजनयन्त्रम् ।

(२) आवर्त्तो जलभ्रमिः, लूता गृहं मर्कटानां तन्तुमयकोशः अपूपकं पिष्टकभेदः, आलवालं वृक्षमूले जलार्थकृतो गर्त्तः "स्यादालवालमावालमित्यमरः" जालं मत्स्यधारणार्थतन्तुनिर्म्मितम् "आनायः

त्रिकोणानि हरेशाक्षिकामाख्यावह्निमण्डलाः ।
सन्ध्यक्षराद्यदम्भोलिशृङ्गाटशकटादयः ॥ ५ ॥
वक्राण्यलकभालभ्रूनखाङ्काङ्कुशकुञ्चिकाः ।
भग्नकङ्कणबालेन्दुदात्रकुद्दालचन्द्रकाः ॥ ६ ॥
शुकास्यं किंशुकं विद्युत्कटाक्षेन्द्रधनुःफणाः ।
पुरोधः करकोलेभदन्तसिंहनखादयः ॥ ७ ॥
तीक्ष्णानि प्रतिभाहीरकटाक्षा दुर्वचोनखाः ।
गुरूणि सद्मनः श्रोणिकपाटस्तनबुद्धयः ॥ ८ ॥

कोदण्डः, घटाननं घटस्य मुखम्, मुद्रिका अङ्गुलिगोमुद्रिका अङ्गुरीयकमिति यावत् । परिखा ग्रामाणां परितो जलाशयभेदः योगपट्टं योगटा इति ख्यातं, स्रक् माला ।

(५) ईशाक्षि शिवतृतीयलोचनं, कामाख्या त्रिकोणाकारं योनिचक्रं, वह्निमण्डलं आगमशास्त्रे सिद्धं त्रिकोणतया ऐं औ स्वरूपाणामागमशास्त्रप्रसिद्धानां सन्ध्यक्षराणामाद्यएकारः, दम्भोलि-

सुखदानि शशी गीतपुष्पलक्ष्मीसुतोद्भवाः ।
नष्टाप्तिस्वस्पृहालब्धिवियुक्तप्रियसङ्गमाः ॥ ९ ॥
दातृस्वातन्त्र्यसन्मित्रविद्यासन्तोषमुक्तयः ।
दुःखानि पारतन्त्र्याधिव्याधिमानच्युतिद्विषः ॥ १० ॥
कुभार्य्यानैस्व्यकुग्रामवासकुस्वामिसेवनम् ।
कन्याबहुत्वहृद्धत्वे निवासः परवेश्मनि ॥ ११ ॥
वर्षाप्रवासो द्वे भार्य्ये कुभृत्योर्द्दहलं कृषौ ।
स्थिराण्याजौ भटः साध्वी धर्म्माधर्म्मौ सतां मनः ॥ १२ ॥
अस्थिराण्यबलादोलापाङ्गयौवनदुर्ज्जनाः ।
स्वामिप्रसादेभकर्णस्वप्नमत्स्यकपिश्रियः ॥ १३ ॥

(९) सुखदानीति लक्ष्मीः सम्पत्, सुतः [पुत्र]स्तानयोरुद्भवः,

मन्दगानि शनिर्ज्ञानी वृषहंसगजस्त्रियः ।
क्रूरस्वराः काकवृकवराहोष्ट्राश्वगर्दभाः ॥ १४ ॥
बलिष्ठान्यनिलो विष्णुर्गरुडो हनूमान् यमः ।
महावराहः शरभः सत्प्रतिज्ञो गजः पृथुः ॥ १५ ॥
हली बाली बलिर्भीमः सती शेषः पुराकृतम् ।
सुरूपा नकुलैलाश्विनलकूबरमन्मथाः ॥ १६ ॥
उष्णानि स्मरतापाधिप्रतापा दुर्व्वचस्तपः ।
मधुराणि विदग्धोक्तिप्रियाधरशशित्विषः ॥ १७ ॥

(१४) शनिः ग्रहः, ज्ञानी तत्त्वज्ञः, वृको व्याघ्रविशेषः ।

(१५) शरभो जन्तुभेदः, पृथुः वैण्यः ।

(१६) हली बलभद्रः, बाली सुग्रीवभ्राता, बलिः वैरोचनिः, भीमः शिवः पार्थो वा, सती दक्षकन्या, शेषो नागराजः, पुराकृतं

अथारोप्यगुणाः ।

औदार्य्यधैर्य्यगाम्भीर्य्यशौर्य्यसौन्दर्य्यशक्तयः ।
माधुर्य्यैश्वर्य्यचातुर्य्यमर्य्यादाक्रौर्य्यकीर्त्तयः ॥ १८ ॥
तेजस्तारुण्यषाड्गुण्यसौलक्षण्यरणज्ञताः ।
ब्रह्मण्यदानदाक्षिण्यशीलशौचसुवेषताः ॥ १९ ॥
सत्यौचित्यकलावत्वमान्यभक्तिकृतज्ञताः ।
दृढ़प्रतिज्ञता प्रज्ञा श्रद्धामेधोद्यमक्षमाः ॥ २० ॥
दयानयार्जवाचारसन्तोषमितभाषिताः ।
विद्याविवेकविनयारोग्यसौभाग्यवक्तृताः ॥ २१ ॥
उत्साहित्वकुलीनत्वनिर्दोषत्वमहेच्छताः ।

(१८) अथ आरोप्या असम्भवा अपि ये गुणा आरोप्यनाय वर्त्तन्ते ।

स्वाराध्यतोषकारित्वाभयास्तिक्येङ्गितज्ञताः ॥ २२ ॥
प्रसादप्रतिभाहृष्योऽभिगम्यसुसहायताः ।
श्रीमाहात्म्यमहारम्भनिर्दम्भत्वाघभीतताः ॥ २३ ॥
बहुश्रुतत्वसौजन्यपरिच्छेदाप्रमादिताः ।
जितेन्द्रियत्वागर्व्वत्वधर्म्माकत्थनतादयः ॥ २४ ॥

अथ सर्व्वाङ्गवर्णनम् ।

प्रपदाङ्घ्रिगुल्फपार्ष्णिजङ्घाजानूरुवंक्षणम् ।
कटित्रिकनितम्बस्फिक्वस्त्युपस्थककुन्दरम् ॥ २५ ॥

(२२) स्वाराध्यता सुखाराधितत्वं, आस्तिक्यं वेदस्मृतिषु [श्रद्धालुत्वं] इङ्गितज्ञता परेषामभिप्रायानुसरणम् उपदेशमात्रेणैव ज्ञानं वा ।

जघनं जठरं नाभिवल्लिवक्षोजचूचुकम् ।
क्रोड़ोरोजत्रुपृष्ठांसकक्षदोःपार्श्वमध्यमम् ॥ २६ ॥
प्रगण्डः कूर्परो हस्तः प्रकोष्ठो मणिबन्धनम् ।
अङ्गुल्यङ्गुष्ठकरभनखपर्व्वचपेटकम् ॥ २७ ॥
कण्ठः शिरोधरा श्मश्रुमुखौष्ठचिबुकं हनुः ।
सृक्कतालुरदाजिह्वानासाभ्रूगण्डलोचनम् ॥ २८ ॥
अपाङ्गस्तारकाकर्णभालमस्तकमूर्द्धजाः ।
यथासम्भवमेतेषु वर्ण्यं स्त्रीपुंसयोर्बुधैः ॥ २९ ॥

(२६) जत्रुः संयोगयोः सन्धिभागः, अंसः स्कन्धः, कक्षो वाह्वोर्मूलं, दोर्बाहुः, पार्श्वं कक्षयोरधः ।

(२७) कूर्परः कफोणिस्तदुपरिभागः प्रगण्डः, प्रकोष्ठः कूर्परा-दधोभागः, मणिबन्धनं करप्रकोष्ठयोः सन्धिः, अङ्गुष्ठो वृद्धाङ्गुलिः, करभः "मणिबन्धादाकनिष्ठं करस्य करभो बहिरित्यमरः" पर्व्वाणि

अथ खण्डश्लेषाः ।

विप्रपदमनोहरविष्णुवक्षःस्थलवत् । द्विपादरचित-
स्थितिनृपवत् । सदाचरणस्थितिं बिभ्रत् भूमिवत् ।
गूढ़पादग्रन्थिमन्दिराकर्षणरज्जुवत् । शुद्धपार्ष्णिर्विजि-
गीषुवत् । जङ्घालसत्कान्तिश्चन्द्रवत् । सज्जानुगतवैभवो[१]

अथ गूढ़पदव्याख्यायां———पण्डितैः प्रपदमित्यादिमूर्द्धज-
पर्य्यन्तेष्ववयवेषु स्त्रीपुंसयोर्लक्षणं वर्ण्ये वर्णनीयम् ।

विप्रेति विशिष्टं प्रपदं पादाग्रं, "पादाग्रं प्रपदमित्यमरः" विप्रपदाघातचिह्नञ्च ।

द्विपदाभ्यां रचिता स्थितिः स्थानं शोभा येन पक्षे द्विपे हस्तिनि च आदरो रागस्तेन चिता व्याप्ता स्थितिः स्थानं येन "स्थितिस्थैर्य्यावकाशे च स्थानमर्य्यादयोरपि चेति रत्नकोषः" ।

चरणस्थितिः पक्षे रणस्थितिर्युद्धस्थैर्य्यं सदा सर्व्वदा, च पूरणे ।

गूढ़ः स्वल्पः पादग्रन्थिर्गुल्फो यस्य पक्षे गूढ़पादः सर्पस्तस्य

धनिकवत्। रम्योरुकान्तिः कन्दर्पवत्। सुवङ्क्षणेन हर्षयन् गणेशवत्। कटिकान्तस्थितिं बिभ्रन्नृपतिवत्। सच्चिकामोदितयज्ञपुरुषवत्। सदामनितम्बालङ्कृतो नन्दकुमारवत्। नवस्तिमितकान्तिराषाढ़ान्तरम्य-भूभागवत्। सुधीरोपस्थामोदितोऽर्ज्जुनवत्। नवककुन्द-

रम्या उर्व्वाः कान्तिर्यस्य पक्षे रम्या उरुर्महती कान्तिरस्येति।

सुवङ्क्षणेन उर्व्वारुपरिसन्धिभागेन पक्षे सुवं मातरं क्षणेन उत्सवेन हर्षयन्।

कन्त्ं कटीदेशस्यकान्ता शोभा पक्षे कटो गण्डोऽस्यास्तीति कटी हस्ती तत्र कान्तां स्थितिं बिभ्रत्।

सत् प्रशस्तं यत् चिकं तेन आमोदितः पक्षे सच्चिणा गृह-मेधिनः कामाय उदितः।

दाम प्रह्वलं तेन सहितः नितम्बः तेनालङ्कृतः पक्षे दाम्ना पशुरज्ज्वा "न पुंसि दाम संदानं पशुरज्जुस्तु दामनीत्यमरः"।

रचितशोभः शिशिरवत्। सर्व्वदारोहपेशलः सुभगवत्। सज्जघनो वर्षाकालवत्। सदा पिचण्डसंरम्भो नृपतिवत्। नाभिभूतस्थितिं वहन् मनस्विवत्[1]। द्विपयोधरसाटोपो नृपवत्। कुचेष्टाभोगभासुरोऽधमवत्। मञ्जुलकुचाग्रं विभ्रद्वनवत्। उच्चैरङ्कसमन्वितो दुःकालवत्।

सर्व्वदा आरोहेण जघनेन पेशलः शोभनः पक्षे सर्व्वेषां दारुणां ऊहे तर्के पेशलः दक्षः।

सन् प्रशस्तो जघनो यस्य पक्षे स उत्तमो घनो मेघो यत्र।

पिचण्डं जठरं तेन संरम्भो यस्य पक्षे सदापि सर्व्वदापि चण्डः संरम्भो यस्य सः।

नाभौ भूता जाता या स्थितिः तां पक्षे अभिभूतः पराभूतस्तस्य स्थितिं वहन्।

द्विपयोधराभ्यां साटोपः पक्षे द्विपो हस्ती योधो भटस्ताभ्यां रसायां पृथिव्यां आटोपो यस्य।

स्पष्टमुत्सङ्गपेशलः प्रातश्चक्रवत्। रम्योरोमान्वितो रल्लकवत्। सदादीर्घपृष्ठविराजितः पातालवत्। समांसरुचिः सिंहवत्। नवकक्षान्तः श्येनवत्। विभुजातिमनोरमो नृपवत्। सुपार्श्वभूषितो रावणवत्। विलसन्मध्यमः स्वरसमूहवत्। अधिकप्रगण्डभूषितो-

स्पष्टं यथा स्यात् तथा उत्सङ्गेन क्रोडेन पेशलः पक्षे स्पष्टा मुत्प्रमोदो यस्य स तथा सङ्गेन चक्रेण वीरादियोगेन पेशलः।

रम्यं यत् उरो वक्षस्तस्य या [मा] शोभा तया अन्वितः पक्षे रम्यो मनोज्ञो रोमान्वितः रल्लकः "रल्लकं कम्बलं प्राहुः"।

दीर्घं यत् पृष्ठं तेन विराजितः पक्षे दीर्घः पृष्ठः स्पर्शः सर्पः।

समौ यावंसौ ताभ्यां रुचिः शोभा यस्य पक्षे मांसे या रुचिस्तया सहितः।

नवः प्रशस्यः कक्षान्तो यस्य, अन्तःस्वरूपं पक्षे नवके न क्षान्तः न तितिक्षुः।

विशिष्टेन भुजेन अ मन रमः पक्षे विभजातिः प्रभजातिः।

ऽरण्यवत् । उल्लसत्कफोणिमाधारो राजरोगिवत् । प्रहस्तस्थितिपेशलो रावणसैन्यवत् । करभासितो विन्ध्यपरिसरवत्[1] । विप्रकोष्ठस्थितिः प्रणववत् । नखर-स्थितिभासुरः शिशिरार्कवत् । सुपर्व्वभूषितो मेरुवत् ।

उल्लसन्ती कफोणेः कूर्परस्य या मा श्रीस्तां धारयतीति पक्षे उल्लसन् कफ उद्भवश्लेष्मदोषश्च अनिमाधारः कृशताधारः श्लेष्माभि-भावेण कृशाङ्गतामास्थितइत्यर्थः राजरोगो सन्निपातो यक्ष्मा-भिभूतो वा ।

प्रहस्तः प्रकृष्टो हस्तः तस्य स्थितिस्तया पेशलः पक्षे प्रहस्तो रावणमन्त्री तस्य स्थितिः ।

करेण भासितः शोभितः पक्षे करभैः उष्ट्रैः "करभाः स्युः शृङ्खलका इत्यमरः" आसितः अधिष्ठितः आसङ् उपवेशने अधिशीङ् स्थासां कर्मेत्याधारस्य कर्म्मत्वात् कर्म्मणि क्तः ।

उच्चपेटस्थितिस्ताम्बूलिकपण्यवत्। अधिकण्ठमनोहरो मन्त्रवत्। गलच्छायासुन्दरः कृष्णपक्षेन्दुवत्। उल्लसितशिरोधरान्वितो वनवत्। सुग्रीवोदितवैभवो रामवत्। अधिकन्धरान्वितो नृपवत्। सदाश्रमश्रुतः कान्तः पर्व्वतवत्। स्फुरन्महादंष्ट्रिकान्तःपल्वलवत्। मुखरो-

उदयच्छन्ती चपेटकस्य केवलस्य कवलस्य स्थितिः शोभा यस्य पक्षे उच्चम् उन्नतं पेटकं पेड़ीति ख्याता तत्र स्थितिर्यस्येति।

अधिकं कण्ठेन मनोहरः पक्षे कण्ठः ध्वनिः पिको वा तद्वत् मनोहरः।

गलच्छायया सुन्दरः पक्षे गलन्ती या छाया तया असुन्दरः।

उल्लसिता ऊर्द्धीकृता या शिरोधरा तया अन्वितः पक्षे उल्लसितं शिखरं यस्य एवम्भूतो धरो गिरिस्तेनान्वितः।

सुष्ठु ग्रीवा तया उदितं वैभवं यस्येति पक्षे सुग्रीवो वानरराजः।

गिरिवत्। मधुराधरः कृष्णबाहुवत्। हनूमद्विभवान्वितो रामवत्। महास्तकायशोभितो नृसिंहनखाग्रवत्।

सुखमाननं तेन रोचितं वैभवं यस्य पक्षे सुखरेषु उचितं वैभवं यस्य।

पृथुलं महत् आस्यम् आननं तेन मनोहरः पक्षे पृथुलं लास्यं नृत्यं तेन।

बहुधा वदनेन स्थितिः शोभा अस्य पक्षे बहूनां वदनानां स्थितिर्यत्र।

अधिकं यथा तथा आननं मुखं तेन रोचिष्णुः पक्षे कानने इति अधिकाननं तत्र रोचिष्णुः।

मधुरो मनोज्ञोऽधरो यस्य पक्षे मधुरां मधुरानाम्नीं पुरीं धरतीति धृ धारणे इत्यस्य मधुरानगरीप्रभेदः कृष्णबाहुवदिति कृष्णबाहुर्गदः [अथवा] मधुराधरः मधुनामानमसुरं राध्यति हिनस्ति इति राध् हिंसायामिति।

हनूमान् यः विभवः शरीरसम्पत् तेन अन्वितः पक्षे हनूमतः

सुसम्पन्नसुतालूनो रेणुका-शिरोवत्। उच्चैरदनभासुरो[1] बालवत्। रसज्ञानवर्द्धिसमुत्साहो धातुवादिवत्। कलयन् नासिकास्थितिं पान्थवत्। नवभूचितः शिशुपालवत्। सदारङ्गखडाभो वणिग्वत्। सदालोचन-

सुसम्पत् सुष्ठुसम्पत् तालु तेन ऊनः नेतिपदं चितये तु योजना पक्षे सुसम्पन्नः यः सुतः परशुरामस्तेन आलूनश्छिन्नो रेणुका यमदग्निदयिता।

उच्चैः श्रेष्ठाः ये रदना दन्ताः, "रदना दशना दन्ता इत्यमरः" पक्षे उच्चैर् अदनं भक्षणं तेन भासुरः शोभमानः।

रसज्ञा जिह्वा, "रसज्ञा रसना जिह्वेत्यमरः" तस्या नवा नूतना ऋद्धिः समृद्धिः तया समुत्साहः पक्षे रसज्ञानं पारदजारणज्ञानं वर्द्धयतीति तथा समुत्साहो यस्येति।

नासिका नासा, "घोणा नासा च नासिका इत्यमरः" तस्याः स्थितिं कलयन् पक्षे आसिका एकत्रस्था तत्स्थितिं न कलयन्।

नवा या भूः तया उचितः समवेतः पक्षे नेति पदं च

भासुरो मन्त्रिवत्। सुदर्शनमनोहरो मयूरवत्। उल्लसितारामो वसन्तवत्। अधिकर्णस्थितिं वहन् दरिद्रवत्। वहन् वैश्रवणस्थितिं कैलासवत्। उच्चैः-श्रवःस्थितिं वहन् इन्द्रवत्। प्रतिभाभासितस्थितिं बिभ्रत् कविवत्। अलिकान्तस्थितिं बिभ्रत् पद्मवत्।

सुष्ठु दर्शनं अवलोकनं तेन मनोहरः पक्षे सुदर्शनं चक्रम्।

उल्लसिताः आ समन्तात् रामाः स्त्रियः "रामावामावामनेत्रा पुरन्ध्रीनारीति हलायुधः" पक्षे उल्लसित आरामो येनेति।

अधि अधिकं कर्णस्य राधेयस्य वा स्थितिं वहन् पक्षे अधिकां अर्णस्थितिं वहन्।

वै इति अव्ययं निश्चयार्थे श्रवणस्थितिं वहन् पक्षे वैश्रवणः कुबेरः "किन्नरेशो वैश्रवण इत्यमरः" तस्य स्थितिं वसतिम्।

उच्चैरिति श्रवःस्थितिविशेषणं श्रवसोः कर्णयोः स्थितिं वहन् "कर्णशब्दग्रहौ श्रोत्रं श्रुतिः स्त्री श्रवणं श्रवइत्यमरः" पक्षे उच्चैःश्रवा

स्फुरत्पृथुललाटश्रीर्भृगुकच्छवत् । उत्तमाङ्गस्थितिं बिभ्रत् कन्दर्पवत् । सदावालमनोहरो वृक्षवत् । वहुकुन्तलसद्द्युतिः सुभटवत् । अधिकेशश्रियं बिभ्रन्नन्दिवत् । कचरोचितः समुद्रवत् । काले वरस्थितिं बिभ्रत् कुमारीवत् । सुसम्पन्नवपूरम्यो नृपवत् । साक्षादधिक-

स्फुरन्ती पृथुर्महती ललाटश्रीर्यस्येति पक्षे पृथुललाटश्रीः पृथुला लाटश्रीः देशश्रीः भृगुं कच्छतीति तीर्थविशेषस्तु लाटदेशे वर्त्तते ।

उत्तमा चासौ अङ्गस्थितिश्चेति तथा तां पक्षे उत् अतिशयेन उद्गता उत्तमा अङ्गस्थितिः शरीरस्थितिः तां बिभ्रत् ।

सदा सर्व्वदा वालाः केशा स्तैर्मनोहरः पक्षे आवालं आलवालं "स्यादालवालमावालमावापेत्यमरः" ।

वक्रः कुन्तलः केशः तेन सन्ती द्युतिर्यस्य पक्षे वक्रकुन्तेन प्रासनाम्नास्त्रेण लसन्ती द्युतिरस्येति ।

अधि अधिका केशश्रियं केशशोभां बिभ्रत् पक्षे अधिका चासौ

विग्रहो दैत्यवत्। उच्चैरङ्गमनोहरो नटवत्। अधिकाय-स्थितिं बिभ्रत् कृपाणवत्। विष्णुरिवाहीनभोग-सङ्गतशरीरो विपक्षासनः सुदर्शनान्वितः। शिव इव परमहसितश्रीः सुशोभनगरस्थितिः। महासेनानुयातो

साक्षात् प्रत्यक्षं अधिको विग्रहो यस्येति "गात्रं वपुः संहननं शरीरं वर्ष्मविग्रह इत्यमरः" पक्षे साक्षात् स्वयमेव कविं शुक्रं "शुक्रो दैत्यगुरुः काव्य उशना भार्गवः कविरित्यमरः," कविम् अधीति अधिकवि ग्रहो ग्रहणं यस्येति ।

उच्चैः अतिशयानि मनोहरः पक्षे उच्चैः रङ्गः नृत्यभूमिस्तत्र मनोहरः ।

अधि अधिकं कायस्य स्थितिं शोभां पक्षेऽधिकमयसो लोहस्य स्थितिं "खर्परेशरि वा विसर्गलोपो वक्तव्य इति" विसर्गस्य लोपः।

अहीनो महान् भोगः सुखं पक्षे अहीनो वासुकिस्तस्य भोगः शरीरं, विपदं त्रासयतीति पक्षे विः पक्षी गरुड़स्तस्य पक्षं पक्ष-स्तत्रासनं यस्य सः, शोभनं दर्शनं चक्षुश्चक्रञ्च तेन अन्वितः ।

विष्वक्सेनोल्लासितविग्रहः । समुद्र इव समानघन-
रसभासितो बहुलवारणो नदीनदेशः सुधामाश्रयः ।
सत्यलोक इव हिरण्यगर्भरुचिः । सोमेश्वर इव प्रभा-
सङ्गतः । रविरिव महोदयान्वितः । अनुरुद्र इव

समाना अनघा या नरसभा तत्र भासितः पक्षे समानः सद्घनरसस्तेन भासितः. बहुलो वारणो हस्ती यस्येति पक्षे बहुलानां वारां रणः शब्दो यत्र, नदीनदेशोऽदरिद्रदेशः पक्षे नदीनां नदानाञ्च ईशः, सुधामाश्रयः शोभनानां धाम्नां आश्रयः स्थानं, पक्षे सुधा अमृतं मा लक्ष्मीस्तयोराश्रयः ।

हिरण्यस्य सुवर्णस्य गर्भोऽभ्यन्तरं यस्य पक्षे हिरण्यगर्भो ब्रह्मा च तत्र रुचिः प्रीतिरस्य ।

प्रभया कान्त्या सङ्गतः पक्षे प्रभासं तीर्थं गतः प्राप्तः, सोमेश्वरो रुद्रमूर्त्तिभेदः [अधुना इतिहासादौ सोमनाथ इति ख्यातः]

महत्त्वञ्च तथा च ताभ्यां समन्वितः पक्षे महान् उदयस्ते-

सद्दोषारुचिः। उद्धृतसारसागर इवापारिजातः। रोहण इव सुरुचिरमणीरमणीयः। इन्द्र इव वलक्षमोदितश्रीः[1]। प्रावृषेण्यहंससंघ इव सन्मानसङ्गतः। श्रोत्रियइव सदाचारप्रियः। देवइवातिसम्पन्नवसुधाभोगी। प्रावृट्काल इव सुखद्योतः[2]। तूनीरइव

बलेन चतुरङ्गेण लक्ष्मया पृथ्व्या उदितश्रीः, पक्षे वलक्षा धवला या सा शोभा तया उदितश्रीः।

सन्मानश्चित्तसमुन्नतिस्तेन सङ्गतः पक्षे सत्मानसं सरोवरं गतः प्राप्तश्च।

सदा सर्व्वदा चाराः गूढ़सेवकाः ते प्रियाः यस्येति पक्षे सदाचारः सत्कर्म्म प्रियं यस्य सः।

अतिसम्पन्ना या वसुधा तस्या भोगो यस्यास्तीति भोगी पक्षे अति अत्यन्तं सम्पत् यस्यास्तीति तया नवसुधा नूतनामृतं तद्भोगी।

सुखेन द्योतः प्रकाशो यस्य पक्षे शोभनः खद्योतो ज्योतिरिङ्गणो यस्येति च "खद्योतो ज्योतिरिङ्गण इत्यमरः"।

सदारोपचितः। वैद्यइव स्वस्थामोदितश्रीः। वणिगिव उपायनसल्लक्ष्मीः। सुराष्ट्रइवाधिकं गौरचितस्थितिः[१]। भृङ्गइव प्रियङ्गौरचिताटोपं बिभ्रत्। तरुणीगणाइव पुरोगौरसाटोपश्रीः। कामिनीकेशपाशइव सदाम-

उपायनं अन्यप्रेषितं वस्तु, तत्र सन्त्यो लक्ष्म्यो ना यस्येति पक्षे उपायः प्राप्तिस्तेन नवाः नूतनाः सन्त्यो लक्ष्म्यो ना यस्येति।

अधि अधिकं गौरी चिता व्याप्ता स्थितिः शोभा अस्येति पक्षे अधि अधिकं कङ्गौ धान्यविशेषे रचिता स्थितिरस्य "स्त्रियौकङ्गुप्रियङ्गू द्वे इत्यमरः" सुराष्ट्रो देशविशेषः।

प्रियं स्पृहणीयं गौरं चितमाटोपं बिभ्रत् पक्षे प्रियङ्गौ फलिनीपुष्पे रचितम् आटोपं बिभ्रत्।

पुरोगाः पुरवर्त्तिनः औरसाः पुत्राः उरसा निर्म्मिता इति विग्रहे "उरसोऽण् च इत्यण्" तेषाम् आटोपस्तेन श्रीः शोभा यस्येति पक्षे पुरोगेन अग्रगतेन औरसयोः स्तनयोः उरस आगतौ

रसमधुरः। दीक्षितइव सुगाज्यघटनादक्षः। दशरथ-इवाभिरामोल्लसितकान्तिः॥ नृपः॥ सैन्यमिव फलकसलक्ष्मीकं सज्जं वीरगणां बिभ्राणम्। विष्णुवक्षःस्थलमिव पुन्नागकृतमालालङ्कृतम्। रुद्रभालस्थलमिव स्फुरितामलकीलाक्षानलम्। कामशरीरमिव सर्व्वदा रूप-शोभितम्। चन्द्रमिव विशाखानुगतम्। समुद्रमिव

अभिरामैः मनोहरवस्तुभिः उल्लासितकान्तिः पक्षे अभि सम्मुखम् रामेण उल्लासितकान्तिः। इति नृपवर्णनम्।

फलैः प्रसारैः कमन्तो लक्ष्मीरस्येति फलकैर्युद्धसाधनचर्म्मभिः सती लक्ष्मीरस्येति च सज्जं कृतसन्नाहादिकं वीरगणं पक्षे सत् प्रशस्तं जम्बीरगणम्।

पुन्नागेन अनन्तेन नागेन कृता या माला तया अलङ्कृतम् अनन्तमूर्त्या हरिणा नागोपवीतं कृतमित्यागमप्रसिद्धं पक्षे पुन्नागो नागकेशरः कृतमालः करञ्जकस्ताभ्यामलङ्कृतम्।

स्फुरन्तः आमलकी धात्री, लाक्षा तद्भेदो, नलस्तृणभेदश्च

स्त्रश्रियम्। क्षेत्रमिव बहुधान्यपुष्टश्रियान्वितम् ॥ वनम् ॥ हिमवन्तमिव सदागजातिमनोहरं शृङ्गाटोपचितं बहुशोभवनान्वितम् ॥ नगरम् ॥ नारीव शृङ्गारोपचित

विशिष्टद्रुमा अरण्यभूस्तया भूषितम् पक्षे विद्रुमाणि प्रवालानि तैः भूषितम् ।

सत् च तत् जपावनं च तस्य वैभवं यस्मिन् पक्षे सज्जः यः पवनस्तस्यापत्यं पावनः हनूमान् तस्य वैभवं यस्मिन् ।

तापिञ्छास्तमालाः, "कालस्कन्धस्तमालः स्यात् तापिञ्छोऽप्यथ सिन्दुक इत्यमरः" तापिञ्छस्तापिच्छेति द्वैरूप्यं तैर्विराजितं पक्षे तापम् विधत्ते या सा तापिनी सा छविः कान्तिस्तया राजितम् ।

विराजिता आम्राणां श्रीर्यत्र पक्षे विराजिनी ताम्रश्रीर्यत्रेति च ।

बहुधा अन्यपुष्टानां पिकानां या श्रीस्तया अन्वितं पक्षे बहुधान्यानां पुष्टा या श्रीस्तया अन्वितम् । इतिवनम् ।

सदा सर्वदा गजैरतिमनोहरं पुनः शृङ्गाटैस्तुष्यथैरुपचितम्

स्थितिः[१]। सर्पइव सद्विषाणां श्रियं बिभ्रत्। खोहइव सदान्नपुच्छविराजी॥ वृषभः॥ नृपइव विपक्षोचित-विभवः। रणइव स्फुरद्विपक्षतिः[२]। तडागइव शतपत्र-विराजितः॥ पक्षी॥ पद्मइव सदामोदरसोदरः। शरत्-

वृत्तौ नगावगावित्यमरोऽपि" शृङ्गाणामाटोपस्तेन चितं बहुशोभानि वनानि तैरञ्चितम्। इति नगरम्।

शृङ्गाभ्यां विषाणाभ्याम् आरोपः तेन चिता परिचिता जाते त्यर्थः स्थितिर्यस्येति पक्षे रणरसेन उपचितस्थितिः।

सन्ति विषाणानि यस्यां सा तां श्रियं बिभ्रत् पक्षे सन्ति यानि विषाणि तेषां श्रियं बिभ्रत्।

सदा अत्र जगति पुच्छं तेन विराजतेऽसौ विराजी पक्षे वपुः सौसं तच्छविः तत् कान्तिस्तथा राजतेऽसौ राजी। इति वृषभः।

विशिष्टा ये पक्षा स्तैरुपचितो विभवो यस्य पक्षे विपक्षेषु वैरिषु उपचितो वृद्धिं गतो विभवो यस्येति।

कालइव उच्चकैरवभूषितः[1]। गिरिरिव कन्दरोचित-
शोभः ॥ मेघः ॥ प्रावृट्कालइव सदारसमुपाश्रितः।
रावणइव स्वकलङ्काभोगः[2]। रविरिव सुधामोदितश्रीः॥
चन्द्रः॥ स्थाणुरिवापत्रपः। गज इव परमहेलाविलासी।
स्वर्ग इव सुरतः श्रियं विभ्राणः ॥ कामुकः ॥ कुहूचन्द्र

स इति भिन्नं पदं दामोदरस्य हृषीकेशस्य सोदरः समान-कान्तिः पक्षे सदा नित्यं आमोदः गन्धः रसः मरन्दः तौ उदरे यस्येति "वा पुंसि पद्ममित्यमरः"।

उच्चकैर्महान् रवः तेन भूषितः पक्षे उच्चानि यानि कैरवाणि तैर्भूषितः।

कन्देषु रोचिता शोभा यस्येति पक्षे कन्दराभिः दरीभिः उचिता शोभा यस्येति। इति मेघः।

सदारैः सस्त्रीकैः समुपाश्रितः पक्षे सदा नित्यं रसं जलम् उपाश्रितः।

इव सूर्य्यसङ्गतः। भृङ्गइवाधिकमलोल्लासी॥ दुर्ज्जनः॥
तारागणइव तिमिरोचितः। वियोगीव विस्तारितापः॥
समुद्रः॥ रम्भवतीव समांसमीना॥ गौः॥ हरिरिव
पद्माकरसुखितः। स्वर्ग इव सदानवारिः॥ गजः॥

अपगता त्रपा यस्य सः पक्षे न पत्रं पातीत्यपत्रप इति नञ् समासः।

परेषां महेला स्त्री तस्या विलासीति "महिलायां महेलापि मेहिला स्यान्महेलिकेति द्विरूपम्" पक्षे परमा या हेला लीला तया विलासी।

सुरतो देवात् श्रियं सम्पदं बिभ्राणः पक्षे सुरतः आद्यादित्वात् तसिः [आद्यादिभ्य उपसंख्यानम्] इन्द्रात् श्रियं शोभां [बिभ्राणः] इति कामुकः।

सूरिभिः पण्डितैः न सङ्गतः असङ्गतः पक्षे कुहूः अमा "सा नष्टेन्दुकलाकुहूरित्यमरः" तच्चन्द्रः सूर्य्येण सङ्गतः युक्तः।

अधिकमलं धिकपापं तत्र उल्लासो तस्यास्तीति पक्षे

गणेश इव परमोदकरुचिः ॥ वराहः ॥ जैननय इव बहुलक्षपणः ॥ वणिक् ॥ नारद इव कलहाविस्थितिः ॥ कामिनीजनः ॥ शुक्र इव सदनुमानः ॥ तार्किकः ॥ निर्व्यापार इव पृथुलक्षणः ॥ वाग्मी ॥ कविरिव

समां समां विजायते इति समांसमीना प्रत्यब्दप्रसूता गौः "समांसमीना सा चैव प्रतिवर्षं प्रसूयते इत्यमरः" समां समां विजायते इति स्वः पक्षे मांसानि मत्स्याश्च तैः सह वर्त्तमाना रसवती पाकस्थानं, "रसवत्यान्तु पाकस्थानमहानसे इत्यमरः"। इति गौः।

पद्मायुक्तकरः शुण्डादण्डः तेन सुखितः पद्मैः विन्दुजालकैः "पद्मं स्याद्बिन्दुजालकमिति हलायुधः" आसमन्तात् युक्तश्चासौ करश्च तेन पक्षे पद्मायाः करः पाणिस्तेन सुखितः हरिः सूर्य्यः तथा पद्माकरः पद्मस्य काननं तत्र सुखित इति वा।

दानवारिणा दानोदकेन सह वर्त्तमानः पक्षे दानवाः दैत्या स्तेषाम् अरिरिन्द्रः तेन सह वर्त्तमानः। इति गजः।

बहुलोहम् ॥ कपाटम् ॥ निशीथ इव प्रबलतमा-
वाहिनी । भूमण्डल इव गिरिभर्तश्रियं बिभ्राणः ॥
रावणः ॥ विष्णुरिव सदारमानवप्रीतिकृत् ॥ प्रावृट्कालः॥
महाकवि श्लोक इव सरसोपचितपादः ॥ गिरिः ॥

स्थितिर्यस्य पक्षे कलहे परस्परविरोधे स्थितिर्यस्य सः । इति कामिनीजनः ।

सत् अनुमानं प्रमाणं यस्य पक्षे दनुर्दैत्यमाता तस्याः मानस्तत्सहितः । इति तार्किकः ।

निर्व्यापारो निश्चेष्टोऽलस इति यावत् बहुलः क्षणः [उत्सवः] यस्य सः "निर्व्यापारस्थितौ कालविशेषोत्सवयोः क्षणः इत्यमरः" पक्षे बहूनि लक्षणानि आवर्त्तकादीनि शुभचिह्नानि यस्य सः । इति वाजी ।

बहु लोहं यस्य सः पक्षे बहुल ऊहो यस्य सः। इति कपाटम्।

प्रबलतमा अतिप्रबला पक्षे प्रबलं तमोऽन्धकारो यत्रेति "अलसन्तस्येति" दीर्घः ।

वर्षोपल इव सत्वरश्चयान्वितः ॥ परिव्राट् ॥ इति खण्डश्लेषाः ॥

अथ शब्दैरपूर्व्वाद्यैः पूर्व्वभागप्रयोजितैः ।
श्लेषाय शब्दमध्येषु निक्षिपेदक्षरं यथा ॥ १ ॥

अपूर्व्वस्वरचेष्टः[1] । आचितखेटकशोभी । उद्योतिपरागशोभः[2] । अञ्चितगजयुतः । खचितद्योतयुतः ।

रसायां पृथ्व्यां उपचितः वृद्धिं गतः यः पादः प्रत्यन्तपर्व्वतस्तेन सहितः पक्षे रसः शृङ्गारादिः पादस्चरणः श्लोकानाम् । इति गिरिः ।

सत्वरं शीघ्रं यः चयस्तेन अन्वितः पक्षे सत्वस्य सत्त्वगुणस्य रक्षया अन्वितः । इति परिव्राट् । पादानां भङ्गेन ये श्लेषास्ते खण्डश्लेषाः ।

(१) श्लेषान्तरमाह अपूर्व्वेत्यादि अपूर्व्वाद्यैरपूर्व्वशब्दादिभिरादिशब्दादाचितद्योतिताञ्चितखचितादीनां ग्रहणम् । अकारः पूर्व्वो यस्य सः ।

घनवह्निस्मरः। छविराजितगल्लः। दामोदितनवश्रीः। धरोचितवल्लः। न व्याप्तक्षत्रनाथः[1]। परोचितवनशोभी। प्रमोदितकटस्थिति[:]। बलोचितहल्लश्रीः[2]। वामोदितमनस्थितिः[3]। विक्रान्तभवोपेतः। विभूषितपदान्वितः। [4]वियुक्तजनप्रियः। [5]व्याप्तपक्षहारी। [6]भरोचितरतश्रीः। रचितमणीभासुरः। सततरसस्थितिः। स्थामोदितवरश्रीः। क्षमोदितपणस्थितिः। संसक्तगरस्थितिः[7]। संप्राप्तसारभूषणः। संभूषितशययुतः। संभावितमदोदयः।

परागः कौसुमरेणुः। पक्षे उपरागः। अङ्गजः। खद्योतः। घस्मरः। छगल्लः। दानवः। धवलः। नक्षत्रनाथः। पवनः। प्रकटः। बहल्लः। वामनः। विभवः। विपदः। विजनः। विपक्षः। भरतः। रमणी। सरसः। स्थावरः। क्षपणः।

कलोपयुक्तकपोतः[1]। प्रस्खलितप्रवालोपेतः। प्रभ्रष्टप्रमदोद्गः[2]। विमुक्तविरहस्थितिः। [3]मालोपयुक्तमानवघनः। [4]मारहितमाधवोल्लसि[त]ः। नरहितनगरालङ्कारः। सुरहितसुधर्माश्रयः।

[5]रचितश्लेषसंश्लेषैर्वर्ण्य(र्णा ?)वर्ण्यादिनामभिः।
उपमानकृतोल्लासैः साधयेत्सर्ववर्णनम् ॥ १ ॥

इदानीं पूर्व्वाचरदूरीकरणेन श्लेषान्तरमाह। कलोपयुक्तेति। ककारस्य लोपेन युक्तो यः 'कपोत' इति पदं तेन 'पोत' इति पदमायातं भवति। एवं वालः। मदः। रहः। नवघनः। धवः। गरः। धर्म्माश्रयः।

(१) रचितश्लेषेण संश्लेषो योगो येषां तैः तथा। वर्णा गौरादयो गुणाः। वर्ण्या वर्णनीयाः पदार्थाः। वर्णिनो वा बलाकाकपोतरासभादयः शुक्लधूसरादिवर्णाश्रयाः। आदिशब्दात्

अहो गौरवसल्लक्ष्मीर्यामिनीकामिनीपतिः ।
[1]सुपर्वपर्वतौपम्यभङ्गीमङ्गीकरोत्यसौ ॥ १ ॥

गौरीभूतकलाशाली परशुभ्रासितोदयः ।
सुपीवरसितोल्लासः स्पष्टां श्वेतश्रियं वहन् ॥ २ ॥

(१) गौरी वसन्ती लक्ष्मीर्यस्येति । पक्षे गौरवेण गुरुतया सती लक्ष्मीरस्येति । 'गौरः पीतसितयोः ।' यामिन्येव कामिनी तस्याः पतिश्चन्द्रः । सुपर्व्वपर्व्वतो मेरुस्तस्योपमाभङ्गी साङ्गीकरोति ॥

(२) गौरीभूता शुक्लीभूता या कला तया शाली श्रेष्ठः । पक्षे गौरी दुर्गा, भूतः प्रेतः, कला चन्द्रकला, एतैः शाली श्रेष्ठः । इह शिवचन्द्रयोरध्याहारेणोपमेयभेदः । एवं सर्व्वत्र यथायथमध्याहार्य्यम् । परः शुभ्रः आसितः स्थितः उदयो यस्य । पक्षे

सदाबलाकाशितश्री[1]र्गिरीशाचलसच्छविः ।
स्फुरच्चन्द्रकसल्लक्ष्मीर्घनसारद्युतिं[2] वहन् ॥ ४ ॥

सदा नवसुधाशोभी बिभ्राणो राजतश्रियम् ।
जातरूपचयच्छायो [2]मधुपीतप्रभान्वितः ॥ ५ ॥

(४) बलाकेव बकपङ्क्तिरिव शिता श्रीरस्य । पक्षे अबलया स्त्रिया काशिता प्रकाशिता श्रीरस्येति । 'काश दीप्तौ' इत्यस्मात् ण्यन्तात् क्तप्रत्यये रूपम् । गिरिशवत् अचला सच्छविर्यस्य । पक्षे गिरिशाचलः कैलासः । स्फुरन्ती चन्द्रवत् कमन्ती लक्ष्मीरस्येति । पक्षे स्फुरच्चन्द्रकेण मयूरपक्षस्येन सती लक्ष्मीरस्येति । घनवत्सारः श्रेष्ठः, कर्पूरश्च ॥

कर्णिकाररचितच्छायः परागश्रीविराजितः।
[1]अधिकार(रु?)ण्यसंशोभी नवेन महसा वृतः॥६॥

बहुलोहितसंपत्तिः प्रवालद्युतिपेशलः।
अधिकद्रुश्रियं[2] बिभ्रत्कडाररचितवैभवः॥ ७॥

(६) कर्णिकारं लकुचकुसुमं तद्वत् चिता प्राप्ता च्छाया येन। पक्षे कर्णिका कर्णभूषणं तेन रचितच्छायः। परागः कौसुमरेणुः तद्वत् श्रीः। पक्षे परा श्रेष्ठा अगस्य वृक्षस्य पर्व्वतस्य वा श्रीः। अधिकं आरुण्यं लौहित्यम्। पक्षे अधि अधिकं कारुण्यं करुणता कृपा च। नवो महेनः सूर्य्यः तन्महसा वृतः पुष्टः। पक्षे नवेन नूतनेन प्रशंस्येन वा महसा तेजसा वृतः॥

(७) बह्वौ लोहिता सम्पत्तिः श्रीर्यस्येति। पक्षे बहुला ऊहिता सम्पत्तिरस्येति। प्रवालो विद्रुमः, प्रकृष्टबालश्च। अधि अधिका कद्रुः पिङ्गला श्रीः ताम्। पक्षे अधिकां द्रूणां वृक्षाणां

नवधूमरसाटोपः सदा [१]सबलसद्रुचिः।
विभात्यधिकपोतश्रीः रासभासितवैभवः ॥ ८ ॥
असितत्वमनोहारी बहुश्यामलतान्वितः।
[२]स्वभावनीलसल्लक्ष्मीः सदारामोदितद्युतिः ॥ ९ ॥

(८) नवेन प्रशंस्येन धूमरेण धूमरगुणेन साटोपः दृप्तः। पक्षे न वधूषु सरसः आटोपोऽस्येति। सदा सर्व्वदा शबलः सितासितमिश्रो गुणः तेन सती प्रशस्ता रुचिरस्येति। पक्षे सत् प्रशस्तं आसवं मधु, सदा सर्व्वदा सवो यज्ञो वा, तेन लसद्रुचिः। अधि अधिकं कपोतवत् श्रीर्यस्य। पक्षे पोतेन शावेन श्रीर्यस्य। रासभो गर्द्दभस्तद्वत् असितं ईषत् सितं वा वैभवं शोभा अस्येति। पक्षे रासेन नृत्यभेदेन भासितं वैभवमस्येति।

(९) असितत्वं अशुक्लत्वम्। पक्षे असिः खड्गः तस्य तत्त्वं तद्विषयकं शिक्षासौष्ठवम्। श्यामलता कालिमा, लताभेदश्च। स्वभावेन नीला सल्लक्ष्मीरस्येति। पक्षे स्वभा स्वकीया शोभा

केशवामोदितच्छायो नदीनश्रीमनोहरः।
अन्धकारातिरोचिष्णुर्बिभ्रत्कुवलयस्थितिम्[1] ॥ १० ॥
[2]स्वर्जनस्थितिरोचिष्णुः स्वर्गलाभचितस्थितिः[3] ।
[4]सदादिविहितोल्लासः सुरावासनयान्वितः ॥ ११ ॥

स्वर्गः।

(१०) केशवत् वामा शोभना उदिता छाया अस्येति। पक्षे केशवा नाम उदिता छाया अस्येति। नदीनः समुद्रः तद्वत् श्रीमनोहरः। पक्षे न दीनश्रिया दरिद्रवत शोभया अन्वितः। अन्धकारवत् अतिरोचिष्णुः शोभनः। पक्षे अन्धकारातिः शिवः। कुवलयं नीलोत्पलम्, पृथ्वीवलयं च। कुत्सितं वलयं कङ्कणं वा॥

(११) 'वर्णवर्ण्यादिनामभिः' इत्यत्र आदिशब्दगृहीतस्योदाहरणम्। स्वर्जनो देवजनः, शोभनमर्जनं च। स्वर्गरूपो यो लाभस्तत्कृता स्थितिरस्येति। पक्षे शोभनं अर्गलं दण्डः तस्य

सव्योमासङ्गविद्योतौ सन्नभोगमनस्थितिः ।
[1]अभ्रान्तद्युतिरोचिष्णुस्सदाकाशचितस्थितिः[2] ॥ १२ ॥

व्योम[3] ।

स्वयम्भूस्थितिविभ्राजी सम्पन्नवसुधास्थितिः ।
[4]स्फुरद्धराङ्कसंशोभी [5]सुक्ष्मासमलङ्कृतः ॥ १३ ॥

भूमिः ।

(१२) स इति पृथक् पदम् । व्योमासङ्गेन विद्योती । पक्षे सव्ये वामे उमायाः पार्व्वत्याः सङ्गेन विद्योती । सत् प्रशस्तं यन्नभसि गमनं तत्र स्थितिरस्येति । पक्षे सन्ना नष्टा भोगे मनसः स्थितिरस्येति । 'खर्पावशरि' इति विसर्गलोपः । अभ्रान्तः आकाशान्तः, न भ्रान्तश्च । सदा सर्व्वदा काशं काश-कुसुम्, सद् गगनं च ॥

(१३) स्वयं आत्मना भुवि स्थित्या विभ्राजी । पक्षे स्वयम्भूः ब्रह्मा शिवो वा । (अ) सम्पन्ना वसुधा च । स्फुरन्त्याः धरायाः

सदाबलिसमुल्लासी सज्जपातालवैभवः ।
अहीनभोगविभ्राजी भूदारस्थितिसुन्दरः[1] ॥ १४ ॥

पातालम् ।

सश्रीकाननरोचिष्णुः कान्तारचितवैभवः ।
अधिकासारसारश्रीर्विधुनीतश्रियं वहन् ॥ १५ ॥

वनादि ।

(१४) सदा बलिर्यत्रेति सदाबलि पातालम्। पक्षे सतां आवलिः समूहः। सदा सर्व्वदा बलिः पूजोपकरणं, चिवलिश्च। सज्जं उत्तमं पाताले वैभवं अस्येति। पक्षे सती प्रशस्ता जपा ओड्रश्च (पा)तालं च, तयोर्वैभवं यत्रेति। अहिः सर्पः तस्य इनः प्रभुः वासुकिः तस्य भोगो यत्रेति अहीनभोगं पातालम्। पक्षे अहीनो महान् भोगः सुखं यत्र। भूदारो वराहः तस्य स्थितिर्यत्रेति भूदारस्थितिः पातालम्। पक्षे अपि श्या उदारा

स्वर्णास्थितिमनोहारी [1]सदानीरोचितस्थितिः ।
सज्जलक्षणविद्योती सदम्भास्थितिपेशलः ॥ १६ ॥

जलाधारः ।

सम्पन्नवे श्मनि स्थायी सदर्नास्थितिभासुरः ।
[2]सद्मनः स्थितिसुद्धिभृत्सुशोभिनिलयस्थितिः[3] ॥ १७ ॥

गृहाधारः ।

(१६) सुशोभनं अर्णः तोयम्, स्वर्णं सुवर्णं च। पूर्व्वपदवि-सर्गलोपः। सदा सर्व्वदा नीरं जलम्। स इति पृथक् पदम्। दानी दाता। इरा भूः वाक् और्वा तदुचितस्थितिः। सत् प्रशस्तं जलं तत्र क्षणं व्याप्य विद्योती। क्षणेन उत्सवेन वा। पक्षे सज्जं उत्तमं लक्षणं चिह्नम्। सत् प्रशस्तं अम्भः, दम्भसहितस्य ॥

(१७) सम्पदा नवे अश्मनि पाषाणे। पक्षे स्वच्छम्। सत्

अहो वामनताटोपः सदाखर्वतमस्थितिः ।
[१]अधिकं प्रांशुसंशोभी सर्वदावालसद्द्युतिः[२] ॥ १८ ॥

आकारः ।

[३]अचलास्थितिविद्योती सदास्थिरश्चितस्थितिः[४] ।
सत्वरोचितलक्ष्मीको मनोज्ञतरलक्षणः ॥ १९ ॥

स्थिरादिः ।

(१८) वामनता खर्व्वता तया आटोपोऽस्येति । पक्षे वामः शोभनः प्रतिकूलो वा, तत्र तेन वा नतो नम्र आटोपो यस्येति । खर्व्वतमो ऽतिवामनः । पक्षे सदा अखर्व्वतमभि स्थितिरस्येति । पूर्व्ववद्विसर्गलोपः । प्रांशुः दीर्घः । पक्षे अधि अधिकं कम्प्रः कम्पनशीलः अंशुः करः । बालः अल्पाकारः । पक्षे सर्व्वस्मिन्

उपकण्ठस्थितिं बिभ्रन्मनौड(ड़?)स्थितिपेशलः[1] ।
[2]अभ्यर्णस्थितिविभ्राजी गङ्गाम्बुनिकटस्थितिः ॥२०॥

समीपम् ।

परमश्लाघी विशदच्छायः

[3]स्वचलच्छायो विशद(हृद्य?)प्रतिभः ।

(२०) उपकण्ठः समीपं, कण्ठसान्निध्यं च । मनौडः समीपं तत्र स्थित्या पेशलः शोभनः । पक्षे स इति पृथक् पदम् । नौडस्थितिः शोभा । नौडे कुलाये स्थितिरिति वा । अभ्यर्णो निकटः तत्र स्थितिः । अभ्यर्णः अर्णसि तोये स्थितिः । गङ्गाया अम्बुनि जले कटस्य गण्डस्य स्थितिरस्य । पक्षे स्पष्टम् ॥

(२१) पक्षे श्लेषान्तरमाह । परमश्लाघावान् । पक्षे परं अश्लाघो । अच्छायः छायायाः अभावो यस्य । विशदा निर्मला

अपिनद्धाङ्गः कान्तोऽङ्गेन
प्रखरोऽत्यन्तं क्षितिमापन्नः ॥ २ ॥

उक्तवैपरीत्यम्।

इति[1] तृतीयं कुसुमं श्लेषस्तबके प्रकीर्णकाख्यम् ॥ ३ ॥

'वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः।'

इति वचनात् अपि शब्दस्याऽकारलोपः। पक्षे अङ्गे शरीरे कान्तिः। पक्षे प्रकृष्टः खरो गर्द्दभ इव। क्षितिं पृथ्वीं आपन्नः। पक्षे क्षिति माऽऽपन्नः न प्राप्तः। माङ् निषेधे॥

उक्तार्थस्य वैपरीत्यं विपर्य्ययः।

एक[1]मात्मेन्द्रहस्त्यश्वगजास्यरदशुक्रदृक् ।
द्वयं पक्षनदीकूलासिधारारामनन्दनाः ॥ १ ॥
त्रयं कालाग्निभुवनगङ्गामार्गेशदृग्गुणाः ।
ग्रीवारेखा कालिदासकाव्यं शूलशिखावलिः ॥ २ ॥
सन्ध्याः पुरः पुष्कराणि रामविष्णुज्वराङ्घ्रयः[2] ।

(१) एकं एकार्थसूचकम्। आत्मा ब्रह्म। इन्द्रः। हस्त्यश्वौ ऐरावणोच्चैःश्रवसौ। गजास्यो गणेशस्तस्य रदो दन्तः। शुक्रस्य उशनसो दृक् चक्षुः।

द्वयं द्व्यर्थसूचकम्। पक्षौ मासपूर्व्वापरार्द्धौ। असेः खड्गस्य धारे द्वे पार्श्वे। रामनन्दनौ कुशलवाख्यौ।

(२) त्रयं त्र्यर्थसूचकम्। कालाः भूतभविष्यद्वर्त्तमानरूपाः। अग्नयो दक्षिणार्हगार्हपत्याहवनीयाः। भुवनानि स्वर्गमर्त्त्य-पातालानि। गङ्गामार्गाः भुवनत्रयगतिभेदात् त्रयः। ईशस्य शिवस्य दृशो नेत्राणि। गुणाः सत्त्वरजस्तमांसि। कालिदासकाव्यं मेघदूत-

चत्वारि वेदब्रह्मास्यवर्णाब्धिहरिबाहवः ॥ ३ ॥
स्वर्दन्तिदन्तसेनाङ्गोपाययामयुगाश्रमाः ।
पञ्चपाण्डवरुद्रास्येन्द्रियस्वर्द्रुव्रतामथः ॥ ४ ॥
महापापमहाभूतमहाकाव्यमखामखाः ।

'ज्वरस्त्रिपादस्त्रिशिराः षड्भुजो नवलोचनः ।'

चत्वारि चतुष्टयसूचकानि। एवं सर्व्वत्र। वेदाः ऋक्सामाथर्वयजूंषि। ब्रह्मास्यानि ब्रह्मणो मुखानि। वर्णाः ब्राह्मणक्षत्रियवैश्यशूद्राः। अब्धयः पूर्व्वापरोत्तरदक्षिणाः समुद्राः। हरेः कृष्णस्य बाहवो भुजाः।

(४) स्वर्दन्तिनः ऐरावणस्य दन्ताः। सेनाङ्गं हस्त्यश्वरथपादातम्। उपायाः सामदानभेददण्डाः। यामाः दिनरात्र्योः प्रहराः। युगानि सत्यत्रेताद्वापरकलयः। आश्रमाः ब्रह्मचर्यादयः। तथा च—

'ब्रह्मचारी गृही वानप्रस्थो भिक्षुश्चतुष्टये।' इत्यमरः।

[पञ्च] युधिष्ठिरभीमार्जुननकुलसहदेवाः। रुद्रस्य शिवस्य

पुराणलक्षणान्यङ्गानिलवर्गेन्द्रियार्थकाः[१] ॥ ५ ॥
षड्वज्रकोणत्रिशिरोनेत्रतर्काङ्गदर्शनम्।
चक्रवर्तिमहासेनवदनर्तुगुणा[२] रसाः ॥ ६ ॥

'पाठो होमश्च तीर्थानां सपर्य्या तर्पणं बलिः।
एतैः पञ्च महायज्ञा ब्रह्मयज्ञादिनामकैः॥' इत्यमरः।
'सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।
वंशानुचरितं चेति पुराणं पञ्चलक्षणम्॥'

अङ्गानिलाः—

'प्राणोऽपानः समानश्चोदानव्यानौ च वायवः।'

वर्गाः कुचुटुतुपवः। इन्द्रियार्थाः विषयाः शब्दरूपरसस्पर्शगन्धाः।

(६) [षट्] वज्रस्य अशनेः कोणः। त्रिशिराः रावणपुत्रः तस्य नेत्राणि। व्याप्यप्रसङ्ग व्यापकप्रसङ्ग इति तस्यापि अवयवाः विषयपरिशोधनव्याप्तिग्राहकादयः षट्। दर्शनानि वैशेषिकन्याय-

सप्त पातालभुवनमुनिद्वीपार्कवाजिनः ।
१वाराब्धिस्वरराज्याङ्गव्रीहिवह्निशिखामयः ॥ ७ ॥
अष्टौ योगाङ्गवस्वीशमूर्तिदिग्गजसिद्धयः ।
ब्रह्मश्रुतिव्याकरणादिक्पालाहिकुलाचलाः ॥ ८ ॥

(७) [सप्त] अतलवितलसुतलरसातलतलातलमहातलपातालानि । भुवनानि भूर्भुवःस्वर्महर्जनस्तपस्सत्यरूपाणि । मुनयो मरीच्यङ्गिरोऽत्रिप्रमुखाः । द्वीपाः जम्बूप्लक्षादयः । अर्कस्य सूर्यस्य वाजिनः अश्वाः । वाराः रविसोमादयः । अब्धयः लवणेक्षुरसप्रभृतयः । स्वराः षड्जमध्यमादयः । राज्याङ्गानि 'स्वाम्यमात्यसुहृत् कोषो राष्ट्रदुर्गबलानि च ।' व्रीहयो धान्यानि माषादयः । वह्निशिखाः ज्वलिनीतापिनीधूम्रेत्यादयः । अग्नेः सप्त जिह्वारूपाः शिखाः । तथा च अग्नेर्जिह्वाः सप्त—

'हिरण्या गगना रक्ता कृष्णान्या सुप्रभा मता ।
बहुरूपाऽतिरक्ता च जिह्वाः सप्त हविर्भुजः ।'

नवाङ्गद्वारभूखण्डछिन्नरावणमस्तकाः ।
व्याघ्रौस्तनसुधाकुण्डशेवध्यङ्करसग्रहाः[1] ॥ ९ ॥

'अणिमा लघिमा चैव प्राकाम्यं महिमा तथा ।
ईशित्वं च वशित्वं च प्राप्तिः कामावशायिता ॥

ब्रह्मणो विधातुः श्रुतयः श्रवणानि । व्याकरणानि माहेश्वर-कपालिमतत्सकलापप्रभृतयः । दिक्पालाः इन्द्रवह्निप्रभृतयः ।

'इन्द्रो वह्निः पितृपतिर्नैर्ऋतो वरुणो मरुत् ।
कुबेर ईशः पतयः पूर्व्वादीनां दिशां क्रमात् ।' इत्यमरः ।

अहयोऽनन्ततक्षकादयः । कुलाद्रयो वर्षाणां सीमापर्व्वताः हिमालयप्रभृतयः ।

(१) [नव] अङ्गस्य शरीरस्य द्वाराणि मुखनासिकाद्वयश्रोत्रद्वय-नेत्रद्वयशिश्नगुदानि । भूखण्डाः इलावृतकेतुमालभद्राश्वप्रभृतयः । छिन्नाः छिन्नाः रावणस्य मौलयो मस्तकानि । मूलशीर्षमेकं विहाय नव मस्तकानि नित्यं छित्त्वा शिवाय नैवेद्यानि कृतानीति

दशहस्ताङ्गुलीशम्भुबाहुरावणमौलयः ।
कृष्णावतारदिग्विश्वेदेवावस्थेन्दुवाजिनः[1] ॥ १० ॥
एकादश महादेवाः सेनाश्च कुरुभूपतेः ।
[2]द्वादशार्का मासराशिसङ्क्रान्तिगुहबाहवः[3] ॥ ११ ॥
सारिकोष्ठकसेनानीनेत्रभूपतिमण्डलाः[4] ।
त्रयोदश स्युस्ताम्बूलगुणा अथ चतुर्दश ॥ १२ ॥

(१०) [दश] कृष्णावताराः मत्स्यकूर्मवराहादयः दिग्वि-दिग्भिदा अष्टौ, ऊर्द्ध्वं चाधश्च द्वे इति दश दिशः। विश्वेदेवाः नाम गणदेवाः दश। तथा च—'विश्वेदेवा दश स्मृताः' अवस्थाः बाल्यादयः। इन्दोः चन्द्रस्य घोटकाः वाजिनो दश ॥

(११) [एकादश] महादेवाः एकादश रुद्राः। कुरुभूपतेः दुर्य्योधनस्य सेनाः अक्षौहिण्यः।

[द्वादश] अर्काः द्वादशादित्याः। मासाः पौषादयः। सङ्क्रान्तयः महाविषुवादयः। गुहस्य कार्त्तिकेयस्य बाहवो भुजाः द्वादश। षण्मुखत्वात्तस्य।

विद्यायमनुस्वाराड्भुवनध्रुवतारकाः ।
तिथयः स्युः पञ्चदश षोडशेन्दुकलाम्बिकाः[२] ॥ १३ ॥
अष्टादश द्वीपविद्यापुराणस्मृतिधान्यकम् ।
विंशती रावणभुजाङ्गुलयोऽथ शतं यथा ॥ १४ ॥

वक्त्रस्याभरणं विशुद्धिकरणं कामाग्निसन्दीपनं
ताम्बूलस्य खलु त्रयोदश गुणाः स्वर्गेऽपि तद्दुर्लभम् ॥'

(१३) [चतुर्दश] विद्याः व्याकरणादयः। यमाः यमाचार्यादयः। स्वाराजः इन्द्रवासवादयः। भुवनानि सप्त पातालानि भूरादीनि च सप्त। ध्रुवमण्डलं व्याप्य परितो या निवसन्ति तारकाः॥

[पञ्चदश] तिथयः प्रतिपदादयः।

[षोडश] इन्दोः चन्द्रस्य कलाः। अम्बिकाः षोडशमातृकाः।

(१४) [अष्टादश] द्वीपाः जम्ब्वादयः सप्त, सिंहलादयः

धार्तराष्ट्राः शतभिषक्तारकाः पुरुषायुषम् ।
रावणाङ्गुल्यब्जदलशक्रयज्ञाब्धियोजनम् ॥ १५ ॥
सहस्रं जाह्नवीवक्त्रशेषशीर्षाम्बुजच्छदाः ।
[2]रविनागार्जुनकरा वेदशाखेन्द्रदृष्टयः ॥ १६ ॥

तेषां[3] यथाक्रममुदाहरणम् :—

एकेन भूमिरिव मेरुमहीधरेण
[4]वक्षःस्थली मधुरिपोरिव कौस्तुभेन ।

(१५) [शतम्] धार्तराष्ट्राः दुर्योधनादयः। शतभिषादिनक्षत्राणि। पुरुषाणामायूंषि। अङ्गुलानि अब्जस्य पद्मस्य पत्राणि। शक्रयज्ञाः इन्द्रस्याश्वमेधाः। मध्यस्थितलङ्कादिद्वीपावधेरब्धेः समुद्रस्य शतयोजनप्रमाणविस्तारम् ॥

(१६) [सहस्रम्] जाह्नवीवक्त्रं गङ्गायाः समुद्रप्रवेशे मुखानां सहस्रम्। शेषस्य अनन्तनागस्य शीर्षाणि मस्तकानि। अम्बुजस्य कमलस्य छदाः पत्राणि। रविनागार्जुनकराः रवेः कराः

गौरिन्दुनेव दृष्टानेन गणाधिनाथ-
भुण्डेव देव! भवतालमकारि धात्री[1] ॥१७॥
पीड्यमाना दृढं ताभ्यां
प्रियदोर्भ्यामिव प्रिया ॥
[2]सिष्विदे च चकम्पे च
सम्मुमोह च सा चमूः ॥ १८ ॥
कण्ठोऽयमस्या मृदुमध्यतार-
स्वरत्रयाधार इति त्रिरेखः ।
मुदं ददाति त्रिजगज्जयाय
प्रयाणशङ्खो मकरध्वजस्य ॥ १९ ॥
किं रोमराजीयमुनाप्रवृत्तौ[3]
बलित्रिदण्डीं कलयन्ननङ्गः ।

वृकोदराद्याः सहसा महाश्रयः
सहोदरास्तं परिवव्रिरे नृपम् ।
द्युहस्तिनो हस्तमिवासुहृद्गण-
[1]च्छिदानिदानं रणपारदा रदाः[2] ॥ २१ ॥

पञ्चत्वं पञ्चेषो-
र्जगदारम्भाय पञ्चभूतानि[3] ।
पञ्चशराः(रौ?) कुसुमेषो-
[4]र्दिवि (गिरि?) भुवि गिरिशस्य जयति
पञ्चमुखी ॥ २२ ॥

(२१) वृकोदराद्याः भीमादयः । नृपं युधिष्ठिरम् । द्युहस्तिनः ऐरावणस्य हस्तः शुण्डः । असुहृद्गणस्य रिपुवृन्दस्य च्छिदायाः छेदस्य निदानं आदिकारणम् । रणे पारं ददतीति रणपारदाः । रदाः दन्ताः । जितपारदा इति च पाठः ॥

(२२) गिरिशस्य शिवस्य पञ्चमुखी जयति । पञ्च मुखानि

तवोग्रमूर्त्तेः शरभूः प्रतापो
दध्रे षडङ्गस्य षडाननत्वम् ।
यत्कुण्डलानीव विरेजुरुच्चै-
श्चण्डद्युतेर्द्वादश मण्डलानि ॥ २३ ॥

लोकेषु सप्तसु दधत्यतिगौरवं ये
येषां गृहा उपरि सप्ततुरङ्गमस्य ।
सप्तर्षयो घनपिशङ्गजटा जयन्ति
ते सप्त हेतय इव ज्वलनस्य मूर्त्तौः (र्त्तेः)[1]
॥ २४ ॥

काशरूपाणि उपादानकारणानि । गिरिभुवि पार्व्वत्याम् । कुसुमेषोः कामस्य । पञ्चशरी पञ्चबाणस्वरूपा । वशीकरणत्वात् । सर्व्वत्र व्यस्तरूपकम् ।

(२३) तव उग्रमूर्त्तेः उत्कटरूपस्य षडङ्गस्य-
'सर्व्वज्ञता तृप्तिरनादिबोधः

गीतं दिगन्तेषु यशोऽष्टमूर्ति-
मूर्तिप्रभं तेऽष्टदिगीश्वमूर्ते![1]।
अष्टाङ्गयोगात्कलिताष्टसिद्धिः
श्रोतुं दधेऽष्टश्रुतितां विधाता ॥ २५ ॥
अन्तर्लसहन्तसितद्युतीनि
कृता(त्ता)नि लङ्काधिपतेः शिरांसि।
नवापि लक्ष्मीं मणिभासुराणां
दधुर्नवानामपि शेवधीनाम्[2] ॥ २६ ॥
निजाश्रुनीरैः स्नपिता हि(दि?)षड्(ड्?)भिः[3]
प्रदीपिता मौलिमणीमृजाभिः।
दशापि ते पादनखाः प्रयान्ति

रूढयौगिकमिश्राख्यास्त्रिधा शब्दाः प्रकीर्तिताः।
[1]व्युत्पत्तिवर्जिता रूढाः शब्दा आखण्डलादयः ॥१॥
योगो गुणेन क्रियया सम्बन्धेन कृतोऽन्वयः।
गुणः स्यान्नीलपीतादिर्नीलकण्ठादयस्ततः ॥ २ ॥
सङ्ख्या अपि गुणा एव वैशेषिकमते ततः।
पञ्चेषुषण्मुखदशग्रीवैकदशनादयः ॥ ३ ॥
कविरूढिच्युताः शुभ्रवपुःषट्कन्धरादयः।
क्रियाः करोतिप्रमुखास्ततः शब्दाः[2] हरादयः॥ ४ ॥
[3]स्वान्नेतृपतिभुक्पालधवमत्वर्थकादिभिः।
सम्बन्धे स्वामिनो नाम कविरूढ्या निगद्यते ॥ ५ ॥

(१) व्युत्पत्तिवर्ज्जिताः इति। यत्तु व्युत्पत्तिः क्रियते मण्डपादिशब्दानाम्। मण्डं पिबतीति मण्डपः। कुशं लातीति कुशलः। एतत्तु व्युत्पत्तिमात्रम्। नान्वयः। तथा चोक्तम्।

[illegible]

कविरूढ्यैव न त्वेवं भूमानंभुभुगित्यपि ॥ ६ ॥

जन्याद्विधातृकरसू-

त्कर्तृस्रष्टृसृग्जनकमुख्याः ।

जनकाद्योनिजजनिभू[2]-

सम्भवरुहभूतिसूत्याद्याः[3] ॥ ७ ॥

[4]तद्यथा—

विश्वविधाता, विश्वकरः, विश्वसूः, विश्वकृत्, विश्वकर्ता, विश्वस्रष्टा, विश्वसृक्, विश्वजनकः ।

जनकाद्यथा —

आत्मयोनिः[5], आत्मजः, आत्मजनिः[6], आत्मभूः[7], आत्मसम्भवः, आत्मरुहः, आत्मभूतिः[8] । आदिशब्दादात्मायनादयः[9] ।

विश्वं सूते विश्वसूः । आत्मनः सकाशात् भवतीति आत्मभूः । आत्मनः सकाशात् सूतिः प्रसवः सम्भवो यस्य स आत्मसूतिः ।

धार्यात्पाण्यस्त्रमौल्यङ्कध्वज[1]भृन्मण्डनसमानाः ।
[2]धव(र?)भर्तृमालिमत्वर्थशालिशेखरसदृक्षाश्च ॥ ८ ॥

यथा शूली तथा सर्पी न शशी हरिणी तथा ।
यथेन्दुमौलिर्न तथा गङ्गामौलिस्तु वाचकः ॥ ९ ॥

भोज्यादन्धःपार्यलिड्भुग्व्रतपानाशनादयः ।
[3]भोज्यभोजकसम्बन्धा यथा स्युरमृतान्धसः ॥ १० ॥

(८) धार्य्यात् कुन्तादेः । पाण्यादयो यथा । दण्डपाणिः । चक्रायुधः । चन्द्रमौलिः । मृगाङ्कः । वृषध्वजः । पाशभृत् । शशिभूषणः । इत्येवमादयः । चक्रधरः । पाशभर्त्ता । चितिक्षत् । किरणमाली । शशी । मयूखशाली । चन्द्रशेखरः । इत्येवमादयः । सदृक्षाः एतत्समानार्थाः । अत्र तेऽपि योज्याः ।

(९) सर्पीत्येवमादयः कविरूढिच्युताः इत्यर्थः ।

पत्युः कान्तादयितावधूप्रणयिनीप्रियाङ्गनातुल्याः ।
पत्न्याः प्रणयिधवाद्याः पतिपत्नीभावसम्बन्धात् ॥ ११ ॥
सख्युः सखिप्रभृतयो [1]वाह्याद्यानासनप्रायाः ।
ज्ञातेः स्वसृतनयात्मजाग्रजावरजसंकाशाः ॥ १२ ॥
आश्रयतः सदनाद्याः सद्मासिशयप्रकाराश्च[2] ।
वध्याद्द्विड्जिद्घातिद्वेषिध्रुग्ध्वंसिशासनविपक्षाः[3] ॥१३॥

(११) पत्युः कान्तादयो यथा । हरिकान्ता । हरिप्रिया । हरिवल्लभा । शिववधूः । पद्मनाभगृहिणी । शक्रप्रणयिनी । इत्येवमादयः । पत्न्याः प्रणयिधवाद्याः यथा । गौरीप्रणयी । लक्ष्मीदयितः । इत्येवमादयः ।

(१२) सख्युः सखिप्रभृतयो यथा । वायुसखः । अग्निसखः । इत्येवमादयः । वाह्यात् यानासनप्रायाः यथा । वृषयानः ।

अप्यन्तकारिसूदनदर्पच्छिद्दमनदारिमथनाद्याः।
सम्बन्धो हि विवक्षात इति पदाच्चिह्नतोऽपि संयोज्याः॥ १४ ॥

औचित्याद्विबुधैः प्राक्कथिताः सम्बन्धिशब्दास्ते।
वृषस्य प्रति वाह्यत्वे शङ्करो वृषवाहनः॥ १५ ॥

धार्यत्वे तु वृषाङ्कोऽयं स्वत्वे वृषपतिस्तु सः॥
व्यक्तिचिन्हाङ्कितो जातिशब्दोऽपि व्यक्तिवाचकः॥ १६॥

(१४) नरकान्तक-दैत्यारि-मधुसूदन-बाणदर्पच्छित्-मदन-दमन-पर्व्वतदारि-सुरमथन इत्येवमादयः॥

(१५) सम्बन्धो जन्यजनकादिलक्षणः विवक्षातः पुरुषेच्छया घटितो भवतीति पदात् चिह्नात् एकस्मादपि सम्बन्धिशब्दाः नियुक्ताः। यथा वाहनयोग्यकाले वृषवाहनः।

यथागस्त्यनिवासा दिग्दक्षिणाशा[1] प्रकीर्तिता ।
शब्दौ त्रिपञ्चसप्तादिवाचकौ विषमायुजौ ।
योजयेत्त्रिनेत्रपञ्चशरसप्तच्छदादिषु ॥ १७ ॥

(१७) दक्षिणाशा इत्युदाहरणम् । अत्र सामान्यविशेषभावसम्बन्धः । नन्वत्र दिक्शब्दो जातिशब्दो न भवति । अनेकव्यक्तिवृत्तित्वाभावात् । तथा चोक्तम्—"नित्यमेकमनेकव्यक्तिवृत्ति सामान्यं जाति"रिति । प्राचीभेदेनानेकव्यक्तिवृत्तितास्तीति चेत् नैवम् । प्राचीत्यादिका संज्ञा सूर्य्यगतिभेदात् कृता । प्रथमं यत्र सूर्य्यः प्राञ्चति सा प्राची । पश्चात् यत्र प्राञ्चति सा प्रतीची । एवमन्या दिक् । किन्तु दिक् एका नित्या विभ्वी कालकृतविपरीतपरत्वानुमेया च । उच्यते । जातिशब्देनात्र जातिरुपाधिश्च द्वयं विवक्ष्यते । तेन कुत्रापि जातिः व्यक्तिचिह्नाङ्किता व्यक्तिवाचिका भवति । यथा चन्दनतरुः

इतरान्तो[1] नञ्पूर्वो गुणशब्दोऽर्थं विरोधिनं वक्ति ।
[2]यथा सितेतरोऽसित एव प्रतिपद्यते कृष्णः ॥ १८ ॥

जलदादिषु पूर्वपदेषु[3] सरोजमुख्येषु चोत्तरपदेषु ।
[4]सुरपतिसमेषु चोभयपदेषु पर्यायपरिवृत्तिः ॥ १९ ॥

पुनर्यौगिकविशेषमाह । विषमायुजाविति । यथा विषमलोचनः । अयुग्मलोचनः । विषमनयनः । विषमबाणः । विषमच्छदः । इत्यादि ।

(१८) सम्बन्धकृतयौगिकविशेषमाह । असित एवेत्यादि । कृष्ण एव प्रतिपद्यते ज्ञायते, न पीतरक्तादिः । व्युत्क्रमेण एवकारो योजनीयः । असित इत्यत्र विरोध्यविरोधिभावः सम्बन्धः ॥

(१९) जलदादिष्विति । अत्र पूर्वपदे पर्यायपरिवृत्तिः । यथा वारिद-नीरद इत्यादि । न तथा वारिप्रद-जलदायक इत्यादि । आदिशब्दात् जलदादीनां ग्रहः । सरोजमुख्येष्विति ।

इति परिवृत्तिसहाये योगास्ते यौगिकाः शब्दाः ।
परिवृत्त्यसहाये ते मिश्रा गीर्वाणतुल्यास्तु ॥ २० ॥

[1]इति द्वितीये शेषस्तबके मिश्राख्यं पञ्चमं कुसुमम् ॥ ५ ॥

इति श्रीमद्वाग्भट्टसूनुमहाकविदेवेश्वरविरचितायां कविकल्पलतायां [2]द्वितीयस्तबकः सम्पूर्णः ॥ २ ॥

सुरपतिसमेष्विति । अत्रोभयपदे पर्य्यायपरिवृत्तिः । यथा सुरेशः सुरपतिः देवेश्वरः इत्यादि । समशब्दात् भूतेश-यक्षेश्वरादीनां ग्रहणम् ।

(२०) गीर्व्वाणतुल्या इति । गीः वाणो यस्येति । तुल्यशब्दात् विश्वक्सेन-सुमनः-पूर्व्वदेवप्रभृतयः ॥

इति कविकल्पलताटीकायां बालबोधिकायां द्वितीयस्तबके

अथ राजेक्षणां गङ्गास्तुतिर्भगवदीरणाम् ।
विप्रलापस्तडागादिवर्णनं वादितर्जनम् ॥ १ ॥
इति यत्र निगद्यन्ते क्रमेण कुसुमानि षट् ।
तं वदामि कथाकल्पं सुधाकल्पं समासतः ॥ २ ॥
अर्थिप्रत्यर्थिनोर्यत्र विमतिः सा कथा द्विधा ।
वीतरागकथा चान्या[1] विजिगीषुकथा यथा ॥ ३ ॥

अथ कथास्तबकः ॥

(२) कथायाः कल्पः कल्पनं यत्र । अथवा कथानामाकल्पं नेपथ्यमिव कथास्तबकं । सुधाकल्पं अमृतसमं समासतः संक्षेपात् तं वदामि ।

(३) कथायाः लक्षणपुरःसरं भेदमाह । अर्थिप्रत्यर्थिनोरिति । अर्थी वादी । प्रत्यर्थी प्रतिवादी । अनयोर्यत्र विमतिः विरुद्धा मतिः सैव कथा द्विधा द्विप्रकारा भवति । एकतरा कथा । वीतो रागो विजिगीषा यत्र । वादकथेत्यर्थः ।

वादी च प्रतिवादी च प्राश्निकोऽथ सभापतिः ।
चत्वार्यङ्गानि तुङ्गानि कथायाः[1] संप्रचक्षते ॥ ४ ॥
अनिन्द्यः सर्वविद्यासु सर्वालङ्कारपारगः ।
सविता कवितापद्मकानने तर्ककर्कशः ॥ ५ ॥
भरते भारते[2] विज्ञः प्राज्ञो मन्त्रादिनाऽथ वा ।
सुवेशः पुरुषो गच्छेत्सभ्यान्सम्भावयन्सभाम् ॥ ६ ॥
अतः प्रथमतस्तत्र धरित्रीरमणं प्रति ।
विद्वद्वृन्दप्रमोदार्थरा(मा)शीराशीनुदीरयेत्[3] ॥ ७ ॥
स्वस्त्यस्तु विस्तारियशःप्रशस्ति-
भ्राजिष्णुदोष्णे भवतेऽवते क्ष्माम् ।

(४) तत्र प्रकारमाह । वादी चेत्यादि । प्राश्निकः प्रश्नकर्त्ता मध्यस्थ इत्यर्थः ।

(६) भरते सङ्गीतशास्त्रे । अथवा पूर्व्वाक्षेपे । मन्त्रादिने-

विपक्षलक्षक्षयदक्षतीक्ष्ण-
कौक्षेयकायाक्षतरक्षणाय ॥ ८॥

[1]अतुल्यकल्याणभवनं भव। प्राज्यं साम्राज्यमासाद्य। चतुःसमुद्रमुद्रावच्छेदिनीं मेदिनीं पाहि। प्रतापतापितारिवर्गो भर्गोपमो भूयाः। विनायकोऽवनाय कोविदस्य भवतु भवतः। शारदा शारदाभ्रशुभ्रा[2] विभ्राजतामकुण्ठे भवत्कण्ठे[3]। सूर्यः सूर्यर्चितः प्रचितोपचयमचिरमारचयतु त्वाम्। अमन्दानन्दाय[4] मन्दाकिनी

(८) प्रशस्तिः विरुदादिलिपिः तया भ्राजिष्णुः दोः बाहुर्यस्येति तस्मै तथा। क्ष्मां पृथ्वीम्। कौक्षेयकः खड्गः। अक्षतं रक्षणं यतः तस्मै अक्षतरक्षणाय ॥

प्राज्यं प्रचुरम्। साम्राज्यं सार्व्वभौमत्वम्। आसाद्य प्राप्य।

सम्पद्यताम्। [1]भृङ्गीशभृङ्गारभृङ्गारकारिवारिभासुरा सुरापगाऽत्र गात्रमतिमात्रमत्रभवतो[2] भवतः पवित्रयतु। सर्वतः पर्वतसुतापतिः पातु। गङ्गाभृ(भृ ?)ङ्गाङ्कितशिराः शिवः शिवं दिशतु देवाथ। सर्वमङ्गला [3]मङ्गलास्पदं करोतु त्वाम्। प्रभविष्णुर्विष्णुः पुष्णातु जिष्णुतां तव। स दामोदरः सदामोदरतस्त्वयि भवतु। त्वयि करोतु करुणामरुणानुजध्वजः। मुकुन्दः कुन्दसुन्दरयशःस्तव-

सम्पद्यतां भूयात्।

भृङ्गीशः शिवः स एव भृङ्गारं जलपात्रं तत्भृङ्गारकारि भङ्गभकारि यद्वारि जलं तेन भासुरा शोभना। सुरापगा गङ्गा। अत्र जगति। गात्रं देहम्। अतिमात्रं निर्भरम्। अत्रभवतः

कितामरं विरचयतु[1]। जायतां निजायताङ्घ्रिभवभुवनैर्भुवनं भूषयन् भगवान् भवदभ्युदयाय[1]। जीव राजीवभूरिव भूरिवत्सरशतानि। चिरं [2]विरञ्चिरिव वञ्चितकालः कलय पुष्कलमायुः। अरविन्दनन्दनो मुदं समुदञ्चयतु। निरविलम्बमविलम्बमामलयमाहिमालयमापालय। अथ प्रबलरिपुकुलप्रलयकालाग्नि-

स्तबकिताम्बरं व्याप्ताकाशम्। स्तबकितं जातस्तबकमिव आकाशं यस्मादिति वा।

जायतां भूयात्। निजः आयतः दीर्घः अङ्घ्रिः तद्भवभुवनैः गङ्गाजलैरित्यर्थः। भगवान् विष्णुः।

राजीवभूः ब्रह्मा। भूरीणि बहूनि वत्सरशतानि व्याप्य जीव।

विरञ्चिः ब्रह्मेव। वञ्चितकालः पराजितमृत्युः। कलय प्राप्नुहि। पुष्कलं विस्तरम्। आयुः जीवनकालम्।

अरविन्दनन्दनः ब्रह्मा। समुदञ्चयतु समर्द्धयतु।

रुद्र[1] ॥ [2]अनन्तगुणमणिगणसमुदयसमुद्र ॥ द्रविणगणा-
गणेयवितरणतृणीकृतगीर्वाणवृक्ष ॥ भरतभगी[3]रथ-
सुरथदशरथरघुनहुषसदृक्ष ॥ विनयविनमदवनि[4]धर-
(व ?)निवहसुवहचरणचारुचामीकरसुन्दरारविन्द ![5]।
सहृदयहृदय ![6]। श्रीगोदमोदमानगोविन्द ॥ रुद्राणी-
रमणचरणपरिचरणचारण ![7]। [8]समस्तसामन्तसीमन्त-

अनन्तः महान् । समुदयः सम्यगुद्गमः ।

द्रविणं धनम् । वितरणं दानम् । गीर्व्वाणवृक्षः कल्पतरुः ।

सदृक्षः समः ।

विनयेन विनमन्तः विनम्राः ये अवनिपतयः भूमिपाः तेषां निवहेन समूहेन सुवहानि सुखेनोह्यानि चरणाः एव चामीकरा-

नीसीमन्तसिन्दूरपूरदूरोत्सारणकारण ।। निष्कृ-
पकृपाणधारावलुप्त[1] मेदिनीपतिमुण्डमण्डलीमण्डित-
चण्डीशमूर्तिमहीमण्डल ।[2] । बलवदरिबलदलनलीला-
खण्डल ।। अतुलतुलापुरुषप्रमुखप्रतन्यमानमहादान-
[3]सन्तानसन्तोषितसर्वोर्वीसुपर्व[4]प्रणीताशीर्वादनादप्र-
मोदमानमानस ।। यशोराजहंसीलीलासलीलनिवासमा-
नस ।[5] । संरम्भोत्तम्भितासिदम्भोलिलीलादलितारि[6]-
दन्तावलावलीमुक्तमुक्तावलीफलोज्ज्वल ।[7] । राज्यलक्ष्मी-
रक्षणविचक्षणदक्षिणदोर्दण्ड ।[8] । डिण्डीरपिण्डपरि-
पाण्डुराखण्डयशःश्रीखण्डमण्डितजगद्दण्ड ।[9] । विल-

निष्कृपः कृपारहितः । चण्डीशमूर्त्तिरिति विशेषणं साभिप्रायम् ।

सद्वनीवनीपकदारिद्र्यमुद्राविद्राविद्रविणाधाराधर ।। तर्जितोर्जितधनुर्द्धर ।। अङ्गवङ्गकलिङ्गभूलिङ्गतैलङ्ग-मगममगधमलयमालवमरुकुरुकाश्मीरलाहौरसौवीरकार-वीरकौरवकश्मीरहरिकेलकेरलकोशलान्तर्वेदिचेदिमहा-[1]राष्ट्रसौराष्ट्रलाटभोटवराटवराहाटकरहाटकर्णाटगौट[2]-गौडचौडद्रविडानन्तनृत्यत्कीर्तिनर्त्तकीनिरूपणनिपुण-गीर्वाणगणस्तूयमानमानदोस्तम्भ ।। [3]सकलसफलस-मारम्भ ।। [4]चातुर्यधर्ममाधुर्यस्थैर्यशौर्यसौन्दर्यसौकुमार्य-मर्यादादयानयाचारविचारदाक्षिण्यदक्षताचक्षमाक्षि[5]-तिपगुणग्रामाभिराम ।। अनवरतकृतसुकृतशतानुकृत-

अवनी पृथ्वी तत्र वनीपकाः याचकाः ।

राम!। अमन्दमन्दरान्दोल[1]दोलायमानोद्दामदुग्धाब्धि-
प्रसूतकमलाविलास[वास?]भवन!। भवनगरनाथ[2]
मधुमथनचरणशरणार्पणामत्पुण्यजन्यानन्यसामान्य-
वैभवाधिनाथ!। सविकाशकाशहरहासव्यासोपन्यास-
सङ्काशवाग्विलासोल्लासकालिदास!। धवलधामाधि-
रूढमूढशृङ्गारप्रौढप्रमोदप्रमदाभदालसविलसन्नयन-
राजीवा(व!)जीवन![3]। त्रिभुवनजनमनोमनोहरमधु-
करसङ्केतकेतकीवन!। जय सभयजनशरण!। जय
कमलक्षमचरण!। जय मदनमदहरण!। जय धरणि-
भरधरण!। देवं [4]नयनाभिरामं राममिव [5]विलोचन-

दोलायमानः चपलः। वासभवनं नृपतिगृहम्।

गोचरीकृत्य कृतकृत्याः प्रशान्तखरदूषणोपप्लवा [1]दण्डकारण्यमुनय इव समजनिष्महि। अयं हि सम्प्रति संवृत्तो देवस्य साक्षात्कारः। संसारमरुसञ्चारसमुद्भूतप्रभूतखेदानां तापत्रयातपतप्तानामस्माकमकस्मादजनि सुधासारकादम्बिनीकदम्बसम्बन्धः। अनेन नवसुधा[2]शीकरपरिस्यन्दिनाऽकालजलदेन निर्वापयता [3]सर्वतस्तापतप्तं शरीरमान्तराणि च करणानि। किं किमस्मभ्यं नोपकृतम्। कानि [4]कानि च सौख्यानि नोपनीतानि। काः काः सम्पदो न सम्पादिताः। केषां केषां कल्याणानां न भाजनीकृताः। किमनल्पजल्प-

खरं तीव्रं दूषणं दोषः तज्जातः उपप्लवः उत्पातः। पक्षे खरदूषणौ राक्षसभेदौ।

संसार एव मरुः निर्जलस्थानम्। प्रभूतः प्रचुरः। तापत्रयं आध्यात्मिकाधिभौतिकाधिदैविकरूपं तदेव आतपः। कादम्बिनी

कल्पनयाऽनया। [1]निश्शेषमहोदयोदयानामतिभूमि-
मध्यास्महे। [2]देवश्च प्रार्थकसार्थं प्रति निधिप्रतिनिधिः।
देवं [3]देवेन्द्ररुद्रोपेन्द्रद्रुहिणमुद्राधरं सत्याश्रयं नासत्याः
श्रयन्ते। देवेन पवित्रचरित्राणि मित्राणि पुरस्कृ-
तानि। न[4] तिरस्कृतानि। देवाय [5]सेवायत्त(त?)यत्नं

अतिभूमिं काष्ठाम्। अध्यास्महे प्राप्ताः स्मः।

प्रार्थकसार्थं याचकवृन्दम्। प्रति लक्ष्यीकृत्य। निधेः निधि-
सञ्ज्ञातधनस्य। प्रतिनिधिः समः।

द्रुहिणः ब्रह्मा। मुद्राधरं लक्षणधरम्। सत्याश्रयं सत्यलोका-
श्रयम्। सत्यायाः सत्यभामायाः आश्रयम्। सत्यवाक्याश्रयं चेति।
यथाक्रमं द्रुहिणरुद्रोपेन्द्ररूपाणां विशेषणम्। नासत्याः सत्यहीनाः
जनाः। अथ च नासत्याः अश्विनीकुमारवंशाः रुद्रादीन् सेवन्ते
इत्युचितमेव।

द्वाःस्थदुःस्थीकृतं सामन्तसहस्रमजस्रं स्पृहयति । देवा-
देवाधिपादिव त्रस्ताः समस्तावनिभृतो निभृतोपक्रम-
मपाक्रामन् । देवस्य निर्दोषः कोषः पोषयति मनीषि-
मनीषितम् । देवे च प्रसादसुमुखे [1]सम्मुखी शेमुषी ।

अपि च । देवस्य महीमहेन्द्रस्यापि सुरसार्थपतेर-
[2]भ्रान्तस्थितेर्बहुनयनलाभरतस्य सहजन्यायाः लोचन-

अवनिभृतः राजानः, गिरयश्च । निभृतोपक्रमं विरलप्रचारं यथा स्यात्तथा । अपाक्रामन् पलायिताः ।

कोषः भाण्डागारम् । मनीषिणां पण्डितानां मनीषितं वाञ्छितम् ।

शेमुषी बुद्धिः ।

मह्यां महेन्द्रः इव महीमहेन्द्रः तस्य । सुराणां सार्थः समूहः । पक्षे सुरसा शोभना पृथ्वी । अर्थः धनम् । अभ्रान्तः मेघान्तः, तत्र स्थितिः । तस्य तादृशत्वात् । पक्षे अभ्रान्त्या अस्खलिता स्थितिः

मनोहारिणः करसम्भृतशतकोटेरमृतभुजः सन्तानमाल-
भारिणः कनकाचलरुचेरुच्चामरराजिराजितस्य’ स्वय-
म्भूमहिम(त ?)स्थितेः[1] काञ्चनशोभां दधानाः [2]सुधर्म-
सभासभासदः सुमनसः ।

'घृताची सहजन्या च रम्भा च मेनका परा ।' इति ॥

अथवा सह एकदा जन्यानां प्राणिनां यः अयः शुभावहं कर्म तस्य यत् आलोचनं सम्यक् ज्ञानं तेन मनोहारिणः । पक्षे सहजं स्वाभाविकं यत् न्यायालोचनं न्यायशास्त्रागमः तेन मनोहारिणः । शतकोटिः वज्रम् । शतकोटिसङ्ख्यातं धनं च । अमृतं सुधां भुनक्तीति । पक्षे अमृतं यज्ञावशिष्टं अयाचितधनं वा । तथा च 'अमृतं स्यादयाचितम् ।' भुनक्तीति । सन्तानमालभारिणः सुरतरुकुसुममालां दधानस्य । 'मालभारिणः' इति 'इष्टकेषी—' ६ । ३ । ६५ इति ह्रस्वः । पक्षे ज्ञातिसमूहपोषकस्य । कनकवत् अचला रुचिरस्य । पक्षे कनकाचले सुमेरौ रुचिः दृष्टिरस्येति ।

[1]काव्यमनोज्ञं सुचरितं। सखा प्रवरः। प्रणयिनः सुखलीना गन्धर्वाः। गुरुर्गृहः। मरुन्नतिनरश्मासम्भावितं [2]सदानन्दनमुद्यानम्। [3]अहो वैचित्र्यमत्र। जनपदाः सदानयज्ञा [4]अनीतयः। उपचितबहुव्रीहयो-

सुधर्म्मा नाम्नी देवसभा। पक्षे शोभनः धर्म्मः यत्रेति। सुमनसः पण्डिताः, देवाश्च।

काव्यस्य शुक्रस्य मनो जानातीति काव्यमनोज्ञम्। पक्षे काव्येन कवितया मनोज्ञं शोभनम्। प्रवरः श्रेष्ठः। प्रवरनामा च।

प्रणयिनः, प्रणयः प्रेम तद्युक्ताः। तथा च—

'प्रणयः प्रश्रये प्रेम्णि याञ्चाविश्रम्भयोरपि।'

सुखलीनाः सुखेन लीनाः। खलीनाश्च। गन्धर्व्वाः घोटकाः, देवयोनयश्च।

गुरुः आचार्य्यः।

ऽविग्रहाः। समहाधन्वानो बहुधान्योदयोल्लासिनः[1]। बहुखलाः सज्जनालङ्कृताः। 'सज्जनसन्निधाना वैदूर्य-भाजः। नितान्तप्रणता उन्नताश्च। कुलीनाः सदान-भोगाः। मन्त्रिणः सदाचाराः। मातङ्गाः स्पृहणीय-

[1] 'अतिवृष्टिरनावृष्टिः शलभा मूषकाः खगाः।

प्रत्यासन्नाश्च राजानः षडेते ईतयः स्मृताः॥'

एवं परत्रापि विरोधाभासाः ज्ञेयाः।

बहुव्रीहिः समासभेदः। बहवः व्रीहयः धान्यादयश्च। अविग्रहाः विग्रहसमासान्तेन हीनाः। कलहहीनाश्च।

महान्तः धन्वानः मरुस्थानानि येषु। पक्षे महाधानुष्काः। बहूनां धान्यानां उदयेन उल्लासिनः। बहुधा अन्येषां उदयेन उल्लासिनश्च।

बहुखलाः बहवः खलाः यत्र। खलः क्रूरः। धान्यमर्द्दनस्थानं च। सन्निधानं सान्निध्यम्, प्रशस्तधनं च।

कुलीनाः कौ पृथिव्यां लीनाः। कौलिन्यवन्तश्च। सदा नभसि

दाना:। [1]भुजगवलया दक्षमखभुजः। भूतिभृतो रजो-रहिताः। सुकेशा निष्केशाः[1]। परिजनः कलानिधिर्न दोषाकरः। दानं समानमसमानम्[2]।

किञ्च किञ्चन वचनमुच्यमानमधुना मधुना समानं मधुनाशनावतारः क्षणमवधारयतु मनसि धारयतु च।

भुजगाः वलयानि कङ्कणं येषां शिवानां ते तथा। पक्षे भुज-प्राप्तवलयाः। दक्षस्य प्रजापतेः मखं यज्ञं दूषयन्ति ये ते तथा। पक्षे दक्षाश्च ते मखजुषश्चेति।

भूतिः भस्मनि सम्पदि। रजः गुणभेदः, धूलिश्च।

निष्केशाः केशरहिताः। निष्कानां धनानां ईशाः।

कलानिधिः चन्द्रः, कलायुक्तश्च। दोषाकरः, दोषाणां आकरश्च।

समानं सदृशं, मानसहितं च। असमानं असदृशं, अपरिमाण-

तथा चामी चामीकराचलवदचलाः कलाकलाप-
मण्डिताः[1] पण्डिताः खण्डिताखिलविपक्षपक्षाः क्षाम्यन्तु
नाम मामकं चापलं विचारयन्तु च मया निरुच्य-
मानमुचितमनुचितं वा। यद्येते सदसद्विचारचातुरी-
[2]चतुराश्चतुरानना इव [3]शिवप्रसादासादितमहित-
महिमानो मानोन्नता[4] नतान्तेवासिवासनोचित-
व्याख्याः। सङ्ख्यावद्गणनायां पाणिनीया इव गणनीयाः।

चामीकराचलः मेरुः तद्वत् अचलाः। चापलं चापल्यम्।

मानेन उन्नताः। अथ च आनताः नम्राः ये अन्तेवासिनः शिष्याः तेषां वासना अभिप्रायः तदुचितव्याख्याः।

सङ्ख्यावन्तः पण्डिताः तेषां गणनायां पाणिनीयाः पाणिनिमुनिशिष्याः।

सकलदिक्कलशस्तनीस्तनकपोलस्थलमलयजमण्डलाय-
मानयशःप्रसराः। दुर्व्यपोहमोहमहान्धकारप्राग्भार-
संहारभास्कराः। कलिकलुषकालकूटकवलनकलाक-
लितनीलकण्ठावताराः। अमन्दमन्दरगिरिपरिक्षुभित[१]-
[२]क्षीराब्धिमध्योल्लसत्कल्लोलविमलहृत्तिमुक्ताफलकला[३]-
पालङ्कृतकण्ठनालाः। अनेककलाविलासोपहसितमि-
तकलकलानिधयः[४]। निरवद्यविद्यानद्याश्रयपयोराशयः।

कलशस्तनी अङ्गना। मलयजः चन्दनः। तन्मण्डलवत् आचरेत्।

दुर्व्यपोहः दुःखेन निरसनीयः। प्राग्भारः समूहः।

कालकूटं विषं तस्य कवलनकला ग्रासलीला। नीलकण्ठः शिवः।

संसारसारसारस्वत[1]स्वतःप्रकाशभासमानासमानवाग्ब्रह्माणो[1] ब्राह्मणाश्चतुरुदधिमेखलाखेलदुच्छृङ्खलकीर्तिनर्तकीकाः । सकलकलाविलासभाजनभाजः[2] सभाजना भ्राजन्ते ।

इति तृतीयस्तबके राजदर्शनं नाम प्रथमं कुसुमम् । १ ॥

सारस्वतः वाङ्मयः । समाना मानसहिता । वागेव ब्रह्म(ह्मा) वेदः । प्रमाणत्वात् । ब्राह्मणः (णाः) तत्त्व [ज्ञाः?] । चतुरुदधयः मेखला यस्येति सकला पृथ्वीत्यर्थः । उच्छृङ्खलं उद्धतम् ।

सकलकलाविलासभाजनानां जनानां अपि । सभाजनभाजः पूजाभाजः । 'सभाजृ याचनपूजनयोः ।' सभाजनाः सदस्याः ।

देवस्योपासनावासनाशंसनाहृष्टाः सत्वरा गत्वरा अपि वयं प्रलम्बविलम्बभाजो यदभूम भूमहेन्द्रस्तत्र हेतुमाकलयतु[1]। अक्षामद्राक्षामण्डपमण्डितस्य पचेलिमफलास्वादमोदमानजानपदस्य [2]विकसदमलकुसुमसमूहसौरभ्यलुभ्यदलिकुलकलितललितक्रीडस्याक्रीडस्य मध्ये चलदलतमालतलशिलातलकलितनिच्छद्म[3]पद्मासनम्। अनिश्वासनासाग्रजाग्रन्नेत्रचित्रभागम्।

देवस्य उपासना उपसेवनाऽभिप्रायेण या आशंसना आशीर्व्वादस्तुतिः तया हृष्टाः। सत्वराः ससम्भ्रमाः। गत्वराः गमनशीलाः। प्रलम्बं विलम्बः अति कालक्षेपः।

अक्षामः अक्षीणः। द्राक्षा मृद्वीका लताभेदः। पचेलिमं स्वयं पक्वम्। सौरभ्यं सुगन्धिता। लुभ्यन्तः लोभवन्तः। ललितक्रीडनस्य आक्रीडोद्यानस्य। चलदलः अश्वत्थतरुः। निच्छद्म निष्कपटम्। पद्मासनं पद्माख्यं आसनम्। तथा श्लोकः

[1]निःस्यन्दमानमदोदबिन्दुपानपीनचकोरचयरचितप-
[2]रिचयकाषायसिचयम् । [3]रागादि(रि?)दारिज्ञाना-
सिचयम् । निखिलोपनिषन्निषण्णमानसम्[4] । परमहंस-
संसदवतंसम् । [5]दुरतिक्रमदुरिताक्रमव्याधिबाध्यमान-
जगदगदङ्कारम् । निर्विकारम्[6] । संश्लिष्टमष्टसिद्धिभिः ।

[1]निस्यन्दः निश्चलः । निस्यन्दमानः संस्रवमयः । सम्मदोदबिन्दुः आनन्दजनितबाष्पजलबिन्दुः, तस्य पानेन पीनः दृढाङ्गः । काषायं कषायेण रक्तम् । सिचयं वस्त्रम् ।

रागः एव अरयः तेषां दारो दारणशीलः ज्ञानमेव असिचयः खड्गसमूहो यस्य तं तथा । उपनिषत् [अ?] द्वैतवादिवेदकाण्डः । निषण्णं आसक्तम् ।

परमहंसाः तत्त्वज्ञानिनः तेषां संसत् गोष्ठी तदवतंसं तन्मण्डनम् ।

दुरतिक्रमं दुर्निरस्यं यत् दुरितं पापं तन्मध्ये आक्रमः आक्रान्तिः पीडा स एव व्याधिः तेन बाध्यमानं यत जगत

अमत्रं मन्त्राणाम्। मित्रं मैत्र्याः। शरणं करुणायाः। मन्दिरं मुदितायाः। सपक्षमुपेक्षायाः। क्षेत्रं क्षमायाः। कोषं सन्तोषस्य। शैलं [1]शीलसलिलस्य। [2]सत्पात्रं पवित्रि(त्र)तायाः। सौधं शुद्धबुद्धेः[3]। आधारं धीरतायाः। गुरुं गुरुतायाः। प्रासादं प्रमादस्य। निदानं चिदानन्दसम्पदः[4]। आश्रयं श्रेयसः। तपसोऽप्युपासनीयम्। परमस्य[5] शमस्यापि सम्यगनुगम्यम्। योगस्याप्यनुयोगयोग्यम्। श्रद्धाया अपि श्रद्धेयम्। [6]अस्पृष्टं दुष्टतया। अन[व]गूढं मूढतया। निरस्तं

अमत्रं पात्रम्।

मैत्री सौहार्द्दम्।

मुदा मदा अनिन्दि(आनन्द?)ता।

उपेक्षा सर्व्वत्र औदास्यम्।

नास्तिकतया। वञ्चितं कुचिन्तया[१]। दूरीकृतं दुरितैः। अगृहीतं प्रतिग्रहैः[२]। अवज्ञातमज्ञानेन। अनङ्गीकृतमनङ्गेन। क्षिप्तं छद्मतया। उत्सारितं मात्सर्येण। [३]असेवितं विषयैः। अलब्धं लुब्धतया। वर्जितमनार्जवेन। अशीलितं दुःशीलतया। [४]निर्वासितं दुर्वासनाभिः अकलितं कलिना। महिलामहिलाला[५]मिव परिहरन्तम्। महामन्त्रिणा पा(प?)वनाभ्याससुघटित-

नास्तिकः वेदाप्रामाण्यवादी।

उत्सारितं दूरीकृतम्।

विषयेण इन्द्रियसुखेन।

अनार्ज्जवेन कौटिल्येन।

अशीलितं असमाहितम्। दुःशीलता दुःस्वभावता दुश्चरित्रता तया। तथा च—

सन्धिविग्रहम् । कामनया वर्जितमपि न कामनया-वर्जितम् । निष्कोपचयमप्यनिष्कोपचयम् । प्रस्फुटमहसमप्यस्फुटमहसम्[1] । [2]न तापकारिणमप्यनतापकारिणम् । गिरावनप्रियं गिरावनप्रियम् । [3]पुरुषमपु(प)रुषमद्राक्ष । [4]लक्ष्मभिरभिनववैरभवैरसमानं भासमानम् ।

विरोधाभासमाह । कामनयेति । कामनया वाञ्छया । अविरोधे न कामनये कामशास्त्रे आवर्ज्जितं आसक्तम् ।

निष्कोपचयं निर्गतकोपचयम् । अनिष्कोपचयं न विद्यते निष्कस्य धनस्य उपचयः सञ्चयः यस्येति तम् ।

[अ?]स्फुटम् । अहसं हासहीनम् ।

नताः अपकारिणः यस्मात् तम् । न तापकारिणं न सन्तापकारकं च ।

गिरि(रा?)वाण्याम्(ण्या?) । वनप्रियं कोकिलमिव । गिरौ पर्व्वते । अनप्रियं नाप्रीतिधरं च ।

[1]अथाभ्युत्थानवेलालीलायितानन्तरं बद्धाञ्जलिर्निरवद्यां [2]गद्यपद्यमयीमयमुदाजहार भारतीम्।

यथाः—

जन्हुजे मम शशिप्रभासिते
भासितेशमुकुटे सदानवे।
दानवेन्द्ररिपुपादनिर्गते
निर्गतेर्भव भवाब्धिपारदा॥

पारदावदातवीचिनिचयक्षालितास्तोकलोकमले।
[3]कमलेशयकमण्डलुमण्डला(ना?)यमानपानीयधाराव-

अभ्युत्थानवेला परमेश्वरोपस्थानकालः, तत्र लीलायितं प्रदक्षिणादिव्यापारः। उदाजहार उवाच।

हे शशिप्रभासिते! चन्द्रकान्तिवत् शुक्ले! हे सदा नवे! नूतने! अथवा सद्भिः आ नूयते स्तूयते या सा सदानवा। निर्गतेः गतिहीनस्य।

धूतनवसुधे । [1]'वसुधेश्वरभगीरथपथवर्तमानजलकल्लोल-मिलड्डिण्डीरपिण्डविडम्बितहरमनोरमतमहासे[2] । महासेनजननि। जननिकरनरकहारिवारिपूरपूरितत्रि-भुवनभवने । [3]भवनेत्रानलकीलकवलितबालेन्दुपालनो-चितपयःप्रदानकुशले । कुशलेखाङ्कितसमीपावने। पाव-नेन्दिन्दिरमन्दिरारविन्दसुन्दरमेदुरापे। दुरापेश्वरशिर-

वसुधेश्वरेति। विडम्बितः सदृशीकृतः हरस्य मनोरमः हासः यथेति सा तथा ।

महासेनः कार्त्तिकेयः तस्य हे जननि ! मातः! । तस्य षाण्मातुरतया गङ्गा माता ।

जनानां निकरः समूहः। त्रिभुवनमेव भवनम् ।

भवस्य शिवस्य नेत्रानलकीला नयनाग्निज्वाला तया कवलितः ग्रस्तः ।

कुशानां लेखया श्रेण्या अङ्किता पूजिता समीपावनिः निकट-

स्सञ्चारसञ्जातपरमगौरवे। [1]गौरवेशविशेषप्रभाविनि-न्दितशारदजलदे[2]। जलदेवतावगाहनक्षुभितसितच्छ-दनिवहभासमाने। समानेकप्रदेशसञ्चारिहरिणप्रा-रब्धकेलिसङ्गरे। [3]सङ्गरेचिततटनिषण्णमुनिजनाकर्ण्य-मानमनोरमारवे। मारवेदनानभिज्ञवैखानसावचित-सारसवने। सवनेज्यमानादिपुरुषवक्षःस्थलस्थायिकौ[4]-

गौरवेश: शुक्लवेश:। शारद: शरत्कालीन:।

जलदेवता वरुणलोक:। सितच्छदं पद्मम्। निवह: समूह:। भासमाने शोभमाने।

सम: अनिम्नोन्नत: य: अनेकप्रदेश: तत्र सञ्चारी भ्रमणशील:। केलिसङ्गर: केलियुद्धम्।

सङ्गरेचित: सङ्गवर्जित:। मनोरम: आरव: शब्द:।

मारवेदना कामजनितपीडा तदनभिज्ञ: य: वैखानस: वान-

स्तुभप्रभासमूहसिते । हसितेश्वरशिरोवर्त्तिशीतद्युति-केतकीकलिके । कलिकेलिभवननगरदाहोद्धुरधर्मा-नलप्रभवारणे । वारणेन्द्रावगाह्यमानघनरसे । नर-[1]शेमुषीसमुदयागोचरहरमौलिमालतीमालाभ्रमकरे । मकरेश्वरपृष्ठाधिष्ठायिचरणकिसलये[2] । मलयेन्द्रादि-वृन्दारकवृन्दविधीयमानयत्ने । नयत्नेश्वरभार्गवाङ्गिरस-

हसितः उपहसितः सदृशीकृतः इति यावत् । शीतद्युतिरेव केतकीकलिका इति रूपकम् ।

कलेः कलिनाम्नो युगस्य यत् केलिभवनं विलासमन्दिरं भवः एव नगरं तस्य दाहे उद्धुरः समर्थः धर्मः एव अनलः वह्निः तस्य प्रभवः उत्पत्तिस्थानं एवंभूता अरणिः दारुभेदः ।

वारणेन्द्रः ऐरावणः । घनं निविडं यत् रसम् ।

नराणां शेमुषी तस्याः समुदयः । भ्रमकरः भ्रान्तिजनकः ।

पचाद्यच् ।

वाङ्मनसागोचरप्रभावे। [१]प्रभावेश्वामृतरश्मिमण्डला-प्लावनसुरसे[२]। सुरसेव्यमानसैकतसन्निधाने। निधा-नेश्वरशैलशिरोविहितरङ्गे। तरङ्गेरितनीरजोदरकुञ्ज-गुञ्जद्भ्रमरे। [३]भ्रमरेणुहरणप्रवीणाम्भःसम्भारसम्भा-विते। भावितेश्वरप्रलम्बजटाकलापे। कलापे-शलस्वर्वासिविलासिनीजनघनजघनावरुद्धमुग्धप्रवाहा-

प्रभावेश्च रोचिषां स्थानं यत् अमृतरश्मिमण्डलं तदाप्लावने सेचने सु शोभनः रसः जलं यस्याः सा तथा।

सुरैः सेव्यमानं सैकतं सिकतामयः देशः तस्य सन्निधानं निकटो यस्याः।

निधानेश्वरशैलः कैलासः तस्य शिरसि शृङ्गे विहितः रङ्गः खेलनं यया सा तथा।

तरङ्गैः ईरितः प्रेरितः।

हृष्टत्रिविष्टपविटपिप्रसूनधवलिते । बलितेजोहारि-
हरिवामपादप्रहारभिदुरब्रह्माण्डमण्डपमध्यराजतै[1]-
कस्तम्भायमानमहाप्रवाहशोभितजगद्दीक्षिते । दीक्षि-
तेप्सितलोकप्रदानपटुतटनिविष्टसन्तुष्टनैष्ठिकगोष्ठीस्त[2]-
वाविर्भावितवासवे । [3]वासवेतसनिकुञ्जनिषण्णकिन्नर-
मिथुनोपगीयमाने । [4]यमानेकमदविनाशनोद्धुरतरवा-

बलेः असुरराजस्य तेजोहारी यः हरिः । भिदुरः स्वयं दीर्य्यमाणः । राजतः रजतसम्बन्धी यः एकस्तम्भः तद्वत् आचरन् । जगद्दीक्षिते जगद्भिः वीक्षिते दृष्टे ।

दीक्षितानां यज्ञप्राप्तदीक्षाणां ईप्सितलोकः स्वर्गादि तस्य प्रदानं तत्र पटुः । वासवविशेषणम् । नैष्ठिकः निष्ठावान् मुनिजना-दिरित्यर्थः । वासवः इन्द्रः ।

रिधाराधारे[1]। राधारेवतीपतिसमाराधितकलिन्द-
कन्यापरिरम्भणावाप्तहरिहरकायशोभे। यशोभेशप्र-
काशनाशितदुरितान्धकारविसरे। विसरेखायमान-
हरशिरश्चन्द्रचुम्बनपटुचटुलचक्रवाकचक्रवालवाचाल[2]-
जलव्यतिकरोद्धृतसगरपार्थिवकुले। वकुलेन्द्रद्रुमादि-
द्रुमच्छायानिषण्णकुरङ्गकुलकवलीक्रियमाणतीरकलमे।
[3]कलमेखलानिनादानुवादिराजहंसरसितोल्लसितवि[4]-

राधारेवतीपती कृष्णबलभद्रौ। कलिन्दकन्या यमुना तस्याः परिरम्भणं आलिङ्गनम्।

यशो यशः। भेशः चन्द्रः। दुरितमेव अन्धकारविसरः तमःपटलः।

विसरेखायमाणः मृणाललतेव आचरन्। चटुलः चपलः। चक्रवालः समूहः। व्यतिकरः सम्पर्कः। सगरनाम्नः पार्थिवस्य राज्ञः। कुलं वंशः।

इन्द्रद्रुमः वृक्षभेदः। कुरङ्गकुलं हरिणवृन्दं तेन कवलीक्रिय-

पुलपुलिनजघनके। घनकेतकीवनपवनान्दोलितनी-
लोत्पलकुन्तले। कुन्तलेलिहानभीषणसमरार्णवसन्त-
रणप्रवीणदेवव्रतनिपीतकुचकलशे। कलशैवालमञ्जरी-
श्यामलालसतिमिनिकरविराजमानप्रवाहभूषितमदन-
दहनमस्ते[1] ।

नमस्ते महामौलिजिताहीनभोगे
नभोगेयकीर्त्ते नमद्विप्रसिद्धे ।
प्रसिद्धेऽस्तु गङ्गे मुदे तेऽम्बुधारा[2]
बुधाराधिते दत्तसन्तानभोगे ॥ १ ॥

घनं निबिडम् । नीलोत्पलान्येव कुन्तलाः ।
कुन्ताः एव लेलिहानाः सर्पाः । देवव्रतः भीष्मः ।
कलं शोभनं शैवालम् । तिमिः जलजन्तुभेदः । मदनदहनः

नभोगे खलाशीविषातङ्कवीशः
कवीशस्तवेमं स्तवं व्याततान ॥
ततानन्तकीर्तिः कलाभाजनानां
जनानां शिरोदाम देवेश्वरोपि ॥ २ ॥
इत्यभिधाय विरराम ॥

इति तृतीयस्तबके गङ्गास्तुतिर्नाम द्वितीयं कुसुमम् ॥ २ ॥

नभसि गच्छतीति हे नभोगे ! खलाः एव आशीविषाः सर्पा तेभ्यः यः आतङ्कः भयं तत्र वीशः गरुडः । कवीशः कवीश्वरः व्याततान विस्तारयामास ।

तता विस्तृता अनन्ता कीर्त्तिरस्येति । कलाभाजनानां कला पात्राणां शिरोदाम श्रेष्ठः इत्यर्थः । देवेश्वरः इन्द्रः । अथ देवेश्वरनामा कविः ।

अथ विहितस्तवस्य भ्रूसंज्ञया पुरुहूताज्ञयेवाहूताः सविनयमुचितोपचितामेतां वाचमवोचाम ॥ नमः [1]कमलाकामुकानुकारावतरणेभ्यः श्रीचरणेभ्यः। सम्प्रति प्रसादप्रासादतः [2]संसारगु(म ?)रुमरीचिकावीचिकामृषातृषापगमभाजः [3]सुधासागरमध्यमध्यगमाम । एतर्हि बर्हिवाहनः कृतात्मसंवाहनः[4] ज्ञानदर्पणः

भ्रूसंज्ञया भ्रूसूचनया। पुरुहूताज्ञया इव आहूताः इन्द्राज्ञयेव आकारिताः। उचितोपचितां उचिता योग्या उपचिता प्रमेयबहुला। उपचितोपचितेति पाठे उपचिता पूजिता।

कमलाकामुकः कृष्णः तदवतारस्वरूपेभ्यः।

प्रसादः प्रसन्नता तस्य प्रासादः गृहम्। मरुः निर्ज्जलस्थानम्। मरीचिकावीचिका मृगतृष्णा। मृषा वृथा। तृषा पिपासा तस्याः अपगमः क्षयः। अगाधमध्यं अतलस्पर्शाम्भः। अगमाम प्राप्ताः स्म।

कृतनिजार्पणः सद्यो याज्ञवल्क्यवाक्यमा[...]
निःश्रेयसश्रेयसे । अधुना धुनाना पापानि सु[...]
ध्वनीनतामयासीत् । अतोऽस्माकं न भविता भ[...]
"भगवन्भवन्मुखसुखावलोकनादुत्सारितातुच्छ[...]
च्छायनिकायस्य कायस्य फलमविकलमव[...]
भवानेको "भवानेकोपपातकव्रातकलभकुल[...]

यस्य । कृतं निजस्य आत्मनः अर्पणं अर्थात् गुरौ याज्ञव[...]
स तथा । आशिश्रिये आश्रितवान् । निःश्रेयसश्रिये मो[...]
नन्दसम्पदे । सत्सङ्गादत्यन्तदुःखध्वंसेन परमानन्दाधिगमो [...]
यदा ज्ञातवान् तदैव याज्ञवल्क्यादेर्ध्यात्मवचनं (?) जग्राह[...]

विनयपुरःसरमाह । अधुनेति । धुनाना कम्पयन्ती [...]
गङ्गा । अध्वनीनतां पान्थभावम् ।

भविता संसारित्वम् । न भविता न भविष्यति ।

उत्सारितः दूरीकृतः । अतुच्छः महान् । कृच्छ्रोच्छ्रा[...]

कवलनकठोरकण्ठीरवः । भवदागमनप्रसङ्गो[1] गङ्गाप्रवाह इवाच प्रायेण प्रावर्त्तत । युष्मद्विजयव्याजेन राजीवजन्मा[2] सन्मार्गोपदेशायास्मै समाजिहीते स्म । उन्निद्रश्चन्द्रो वाऽऽगत्य धरणीसरणीरमृतसारणीभिरभिषिषेच[3] । किं बहुना । भवादृशां दर्शनमेव दारुणदुरितदारणम्[4] । सम्भाषणमेव निखिलोपनिषन्निषेव-

करिशावकः । निराकुलकवलनं यथेष्टग्रासः । कठोरः निष्ठुराङ्गः । कण्ठीरवः सिंहः ।

प्रायेण बाहुल्येन ।

विजयव्याजेन प्रस्थानच्छलेन । राजीवजन्मा ब्रह्मा । सन्मार्गस्य सत्पथस्य । उपदेशाय प्रदर्शनाय । अस्मै प्रस्तुतदेशाय । प्रा (समा ?) जिहीते स्म प्रस्थितवान् ।

उन्निद्रः उदितः । सरणौ पदवी । अमृतसारणीभिः पीयूष-

णाम् । स्पर्श एव स्पर्शाश्मलाभः । शुश्रूषैव ब्रह्मशुश्रूषा । सन्निधानमेव[1] सन्निधानम् । समाराधनमेव धनम् । तदद्य निरवद्यं दिनम् । तिथिरतिथिः [2]श्रेयान्मुहूर्तः सम्पद्यत । मातापित्रोः पवित्रोऽन्वयः प्रतिष्ठानिष्ठामवाप । नित्यकृत्यानि[3] कृतकृत्यानि । नित्याभ्युदयभाजो वयम् । यद्यपि कृपामृतस्पृशा दृशा भृशं कृताः कृतार्थास्तथापि वाचालता वाचालताकाण्डमकाण्डं ताण्डवयति । भगवन् ! परित्यागादृक्शक्लेशः कतमो देशः कृतः । स्वच्छन्दमागच्छद्भिरच्छधीभिः के के वाऽऽश्रमा गतश्रमा

तत् स्पर्शाश्म यस्य स्पर्शेन सर्व्वे धातवः हिरण्मयतां प्रयान्ति।

विश्रमादक्रियन्त। कच्चिदुल्लाघापघनता घनतामातनोति बहुश्रेयसाम्[1]। अत्र पवित्रचरित्रैरयं कियन्ति दिनानि यावदावसथः सनाथः[2] क्रियते। कियन्त्यहानि[3] पुण्यहानिरहितैरिहातिवाहनीयानि माननीयैः। क वा यियासाऽऽयासातिशयदायिनी। भगवन्तः कियन्तः श्रीमतामन्तिके ज्ञानामृतस्नातकाः[4] प्रतिनिवसन्ति। निषिद्धविरुद्धजनाधिकरणं किमधिकरणं

कच्चित् प्रश्ने। उल्लाघः निर्गतः गदात्। अपघनं अङ्गम्। घनतां नैविड्यम्।

आवसथः आवासः।

अतिवाहनीयानि प्रापणीयानि।

यियासा गमनेच्छा। आयासातिशयदायिनी अतिशयखेदकारिणी।

व्याख्यायते विख्यातख्यातिवादैः श्रीपादैः। कियत्सङ्ख्याः सङ्ख्यावन्तः श्रोत्रियाः श्रोतारः। प्रशस्तसमस्तपुस्तकसङ्ग्रहोऽस्ति न समस्ति वा। सन्यासात्प्रागेव गेयचरितैरधिजगे खगेन्द्रवाहनावाहनाऽमलमतिभिः। उत सन्यस्य [1]गुणराशिभिः प्रथमाश्रमादेव देवतावतारैः सन्यस्तम्। अथ[2] पृथुलश्रमाद्द्वितीयाश्रमात्। विश्वाभयदानदक्षदक्षिणहस्तानां सन्यस्तानां काकोदरनाथकोदरसुमदामोदरदृढाश्लेषोल्लासितरमास्यानि

करणग्रन्थस्य। ख्यातिवादैः ख्यातिपक्षकवादिभिः। प्रसिद्धैर्वा। श्रीपादैः कृतसन्यासैः।

सङ्ख्यावन्तः पण्डिताः। श्रोत्रियाः वेदज्ञाः।

न समस्ति न सम्यक् अस्ति।

गेयचरितैः प्रशंस्यचरितैः। अधिजगे पठितम्। खगेन्द्रवाहनः

कति चातुर्मास्यानि। सम्प्रति निःप्रतिमप्रज्ञावज्ञातसुरगुरवः श्रीगुरवः कस्मिन्नुपवर्त्तने वर्त्तन्ते। कियती यतीश्वराणामजनि जनितः प्रभृति विमला वर्षमाला। अद्य वन्द्यपादानां साधुमाधुकरी भिक्षा पीयूषकक्षामनूचानचयगृहेषु ग्रहीष्यति, किमु कस्यापि भाग्यभाजो भवने भवनेपथ्यभूताभिख्या भविष्यत्येकभिक्षा।

गात्रमात्रमुपस्थितम्। रमा लक्ष्मीः, तस्याः आस्यं मुखम्। कति कियत्परिमाणानि। चातुर्मास्यानि वार्षिकव्रतानि।

उपवर्त्तने देशे। वर्त्तने जीवनोपाये।

यतीश्वराणां सन्न्यासिश्रेष्ठानाम्। जनितः प्रभृति जन्मादितः। वर्षमाला वत्सरश्रेणी।

प्रतिपद्मं मधुकराः इव प्रतिगृहं श्रोत्रियाणां यतय यां

अन्यच्च, श्रीमतां[1] वेदान्ते वेदान्तेवासिप्रसिद्धिभिरेव जनो भगवन्महिमानम्। मीमांसां[2] निस्सीमां साम्प्रतं प्रतिपद्यामहे महेच्छानाम्। भवदुपन्यासाद्विहित-कणादानुवादा अक्षपादानुवर्त्तिन्यो विद्याः प्रसिद्ध-बौद्धप्रयुक्तकुतर्ककर्कशशरेभ्यो न बिभ्यतीत्यभ्यर्हिताः प्रकाममामनन्ति। सङ्ख्ये[3] त्वमसङ्ख्येय[4]सङ्ख्यावत्सङ्ख्ये मुख्य-

वेदान्ते वेदान्तदर्शने। वेद जानाति। अन्तेवासिनां शिष्याणाम्। प्रसिद्धिभिः।

मीमांसा जैमिनिमुनिप्रोक्तशास्त्रम्। निस्सीमां निरवधिभूताम्। साम्प्रतं इदानीम्। प्रतिपद्यामहे जानीमः।

विहितः कणादस्य कणादमुनिप्रोक्तस्य वैशेषिकदर्शनस्य अनुवादः अनुकारः याभिः ताः तथा। न्यायसमानतन्त्रं वैशेषिकदर्शनमिति प्रसिद्धमेव। अक्षपादानुवर्त्तिन्यः विद्याः न्याय-

तया लिख्यन्ते[2] लेखैरपि युष्मादृशाः। आपातप्राञ्जल-पातञ्जलजलधिरञ्जलिना कलितः कलितमोहारिभिः। गुणानां[3] साहित्यं सांहित्यमादधाति धातृतुल्यानाम्। तत्तद्रसप्रसवित्वं कवित्वं बिभर्त्ति कीर्त्तिमतामित्यनुशुश्रुम। अतएव युष्माभिरनूष्माभिषङ्गैः स्मं सविस्मयाः समगंस्महीत्यभिहिते विहितयथोचितानु-

पण्डितानां, सङ्ख्यायां सम्यक् कथने गणनायां वा। मुख्यतया श्रेष्ठतया। लेखैः देवैरपि भवन्तः लिख्यन्ते।

आपातप्राञ्जलः अविचारतः सुगमः। पातञ्जलं शास्त्रं षष्ठं दर्शनं तदेव जलधिः। कलितः गृहीतः। कलितमोहारिभिः। कलिजन्याज्ञानध्वंसकैः।

सांहित्यं सङ्घातः। साहित्यं काव्यादि।

तत्तत् प्रसिद्धम्। रसप्रसवित्वं रसजनकत्वम्। कवित्वं

वां ¹प्रदक्षिणाचरणप्रणामादिना सप्रसादं प्रस
तदनु तदनुज्ञया ततस्तीव्रमाव्राजिष्म ॥

इति ²तृतीयस्तबके भगवद्दीरणं नाम तृतीयं कुसुमम् ॥ ३

तस्यानन्तरम् । तदनुज्ञया तस्याज्ञया । ततः तस्मात् स्थानात
तीव्रं शीघ्रम् । आव्राजिष्म आगताः स्म ।

इति तृतीये तृतीयं कुसुमम् ॥ ३ ॥

अथ दक्षिणेन क्षोणीपतिमार्गं भार्गवमिव परशु-भोल्लासितम् । अमृतसम्भारमिव कुण्डलसल्लक्ष्मीकम् । वशिष्ठमिव वशिश्रेष्ठम् । पराशरमिव पराशयज्ञम् । वेदव्यासमिव वेदव्यासक्तम् । [1]शुकमिवाशुकलितपर-मार्थम् । दुर्वाससमिव दुर्वासनाशून्यम् । जमदग्नि-मिवा[2]नमदग्नितेजसम् । [3]गर्गमिव भर्गभाजम् ।

दक्षिणेन क्षोणीपतिमार्गं राजवर्त्मना दक्षिणभागं ब्राह्मण-मुपागम्य इदं अत्रादिषम् इत्यन्वयः । मार्गं इति 'एनपा द्वितीया' २।३।३१ इति द्वितीया । भार्गवं परशुरामम् । परेषां शुभया उल्लासितम् । परशोः परश्वधस्य भा दीप्तिः तया उल्लासितं च ।

कुण्डलाभ्यां सन् लक्ष्मीः यस्य तं तथा । पक्षे कुण्डे लसन्ती लक्ष्मीः यस्य ।

वशिश्रेष्ठं जितेन्द्रियश्रेष्ठम् । पराशयज्ञं परेषां अभिप्रायविदम् ।

सत्रिप्रवरम्[२]। क्रतुमिव क्रतुक्रियाकोविदम्। कुत्स-मिव अकुत्सचरितम्। वत्समिव वत्सलम्। जाबालि-मिव जाबालिदयालुम्। त्रयीपथप्रथमपान्थम्। तरु-णायमानकरुणारसनिर्यासपीयूषवर्षिभिर्दृगञ्चलैरुदञ्च-

वश्यपवनेन्द्रियं स्वाधीनप्राणचक्षुरादिकम्।

श्रौतमतं वेदहितं कर्म तस्य प्रवर्त्तकम्।

सत्रिप्रवरं श्रोत्रियश्रेष्ठम्।

क्रतुक्रियाकोविदं यज्ञक्रियाभिज्ञम्।

अकुत्सं अनिन्द्यं चरितं चरित्रं यस्य तं तथा।

वत्सलं दयालुम्।

त्रयीपथ: वेदमार्ग:।

तरुणायमान: वर्द्धमान: करुणारसनिर्य्यास: आनन्दाश्रुप्रवाह: तदेव पीयूषं अमृतं तद्वर्षिभि: दृगञ्चलै: अपाङ्गै: उदञ्चयन्तं

यन्तमिव चन्द्रचक्रवालम्। ईषदुन्मिषद्दशनदीधितिच्छ-लेन स्वच्छमाशयं प्रकाशयन्तम्। उपमठपठदकुण्ठ-कण्ठवैकुण्ठभक्तविरक्तप्रव्यक्तोक्तसूक्तसंभक्तचेतसमूर्द्ध्वरेत-समजिह्मं 'ब्रह्मनिष्ठं ब्राह्मणं सम्यगुपागम्य' एतद-वादिष्म॥

श्रीमन्नमस्कुर्महे महेशमहसामनभवतां भवतां विहिततीर्थसार्थसञ्चरणौ चरणौ। भवांश्च चतुरान-नोऽप्यनष्टश्रुतिः। पुरुषोत्तमोऽपि न मायावल्लभः।

ईषत् अल्पं उन्मिषन्ती प्रभासमाना दशनदीधितिः दन्तच्छटा तच्छलेन अच्छं शुभ्रं आशयं अन्तःकरणं प्रकाशयन्तम्।

उपमठं मठसमीपे। अकुण्ठः अमन्दः। वैकुण्ठभक्ताः वैष्णवाः। विरक्ताः निर्विण्णाः। सूक्तं शोभनं उक्तं स्तवादि। ऊर्द्ध्वरेतसं योगिनम्। अजिह्मं [ब्रह्म]निष्ठं अद्वैतपरम्।

'गिरिशोऽपि नास्थिरचितशोभः। ततो न कस्य नमस्यः। भवतः कलानिधेरनुपाधिरियं चातुरी, यच्चतुरचन्द्रकान्ताननांशुरोचितं वचनपीयूषं वर्षतीति निरवद्यालापपद्यामनुसरामः। एकः सातिरेकविवेकः केषां विदुषां परिषदि न गण्यसे पुण्यप्रेमुषीकः'।

गिरीशः शिवः, गिरः वाण्याः ईशश्च।

'गिरिशो गौरिशो वापि गिरीशश्च प्रकीर्त्तितः।'

इति शब्दमहार्णवः।

नास्थिरचितशोभः न अस्थ्ना कीकसेन रचितशोभः। न अस्थिरा चिता शोभा यस्येति च।

भवतः तव। कलानिधेः चतुःषष्टिकलानिवासस्य, अथ च चन्द्रस्य। अनुपाधिः नैसर्गिकी। चातुरी चतुरता। इयं हि, चतुरः दक्षः, यच्चातुरी कर्त्री। चन्द्रकान्ताननस्रवोचितं चन्द्रवत् कान्तं यत् आननं तस्मात् स्रवणं निःसरणं तदुचितम्। अथ च

[1]आसीद्यास्मदीया दिदृक्षा प्रेक्षावन्तं भगवन्तं[2] प्रति सम्प्रति[3] सा पूर्णा । न किमप्यपेक्ष्यमपेक्षते यदन-वद्यविद्याविद्युद्द्योतोद्द्योतितमेदिनीमण्डलानामवि-कलां[4] कलां कलयामः कुशलतां कुशलतां दधतां श्रीमताम् । तथापि मुदा सदाचारस्वच्छा पृच्छासौ विधीयते [5]भव्यमव्यवहितमव्याहतचित्तानाम् । कच्चि-दाचारचातुरीतुलितविरल[6]पुरुषरत्नानामियमेव नगरी गरीयसी, सदावदातभगवदवस्थानात्[7] । उत कुतो-ऽप्यागतं वतंसभूतैर्भूतलस्य । कियन्तः श्रीमतामि-

आदीया (?) अस्मदीया आद्या (?) । दिदृक्षा दर्शनेच्छा । प्रति लक्षीकृत्य । पूर्णापूर्णा अतिशयेन पूर्णा ।

विद्या एव विद्युतः तस्याः उद्योतः प्रकाशः । अविकलां अप्रतिहताम् । कुशलतां दर्भलताम् ।

पृच्छा प्रश्नः । भव्यं कुशलम् । अव्यवहितं व्यवधनशून्यम् ।

छायग्रहारा [१]धराग्रहाराः शालिशालिनः। कश्चिद्वि-पश्चिद्यजमानो भवन्न नोचितो वर्त्तते कीर्तिमताम् । प्रतिग्रहं[२] प्रति ग्रहं जहति महति यत्ने महितमहि-मानः। गृह एव निगृहीतेन्द्रियग्रामैरव्यग्रमवस्थीयते । किं वा क्वापि कदापि [३]गम्यतेऽनवगम्यतेऽजोभिः । कस्मिन्नप्यवसरे नरेश्वरावासं [४]प्रति सम्प्रति याचा क्रियते न्यक्क्रियते वा तत्सम्बन्धः। कति प्रतिदिनं स्नानानि [५]सम्भवन्ति शुभवन्ति। माध्यन्दिनं कर्म निर्मम्ते

छायग्रहाराः छत्राणि । धराग्रहाराः पृथ्व्याः श्रेष्ठहाररूपाः शालिशालिनः कलमादियुक्ताः ।

निर्ममेहितैः। भोजनमजनि रजनि[जानि]करनिकर[१]-निभमुभयशसाम्। उत[२] विचक्षणानां क्षणादुपरि परिस्थितिर्भविता भोजनस्य। [३]कस्मिन् वादिगिरि-विदारणदारुणकुलिशास्त्रे शास्त्रे मेदुरः स्फुरत्यादरो दरोन्निद्रतामरसोदरसोदरनेत्राणाम्। [४]कापि व्याक्रि-यते व्याख्या। उत न व्याक्रियते किमपि। [५]प्रत्यह-महं यथा भवदवलोकनादामोदमासादयामो[६] दथा-मोदितमनोभिः सुमनोभिस्तथा विधेयम्। इत्य-

निर्ममे कृतम्। निर्ममेहितैः निर्ममत्वचेष्टितैः।

रजनिचरः चन्द्रः।

भविता भविष्यति।

कुलिशास्त्रे वज्ररूपास्त्रे। मेदुरः स्नेहनिबद्धः। दरोन्निद्रं ईषद्विकसितं तामरसं पद्मं तस्य उदरपत्रं अन्तःस्थपत्रौ तस्याः सोदरं सदृशं नेत्रं येषां तेषां तथा।

स्माकमाकर्ण्य कर्णरसायनं[१] वचनं तैरपि कपिल-मुनिकल्पैरनल्पजल[२]धरध्वनिमधुरगम्भीरतारभारती[३]-प्रतिशब्दमुखरितमन्दि(न्द !)रोदरमिदमुदीरयामासे। सुचिरमपरिचयवशादसाम्प्रतं[४] साम्प्रतपौर्वापर्यविपर्य-[५]योद्यदकस्मादस्माभिरधीयते। तत्र पवित्रगुणगौ-[६]ढूपणगणग्रहणग्रहिलैर्न भाव्यं [७]भावव्यञ्जितमहित-महिमभिर्महाशयैः। नयनयोरमितममृतद्रवं स्रवन्तः के भवन्तः। अभिवादये [८]दयेन्दिरामन्दिरायमानहृदयान्

कर्णरसायनं श्रोत्राप्यायनम्। मन्दिरोदरं इति क्रिया-विशेषणम्। उदीरयामासे उक्तम्।

असाम्प्रतं अयोग्यम्।

भावव्यञ्जितमहितमहिमभिः स्वप्रकाशेनैव व्यक्तीकृतपूजित-महत्त्वैरित्यर्थः।

रविन्दान्युष्मानन्ष्मायितान् । सम्यगागम्यतां नितान्तपवित्रचरित्रैः । इहोपविश्यतां दृश्यतां दधानैर्गुणनिधानैः । सर्वतः शर्म [1]स्वधर्मनिर्मलमनसां सुमनसाम् । कुतः कुतर्कसम्पर्करहितैरिहायातम् । [2]गृहादिहागम्यते गम्यते क्वाभिः श्रीमद्भिः, उत कुतश्चिद्दिपश्चिद्वरेण्यैरन्यतः । अद्यागमनेनायं ग्रामो गुणग्रामोचितः[3] कदा विरचितः परिचितकलाकलापैर्मधुरालापैः । किं नाम नाम निकामनिर्मलमतीनाम् । विहितविद्वज्जनहर्जिननिर्वासः[4] क्व वासः कृतः कृतज्ञैः । अयं संवसथः सनाथः कियन्ति वासराणि करणीयः । किं किमधीतं सुधीभिः । किं किञ्चन[5] पुस्तकमस्ति स्वस्तिमताम् ।

दृश्यतां मनोज्ञताम् ।

शर्म सुखम् ।

निर्मितामितखेदच्छेदः[1] को वेदः कोविदैः पठ्यते। का वा शाखा विशाखानुकल्पानाम्। को देशः पेशलप्रकृतीनाम्। अदृष्याः पोष्याः कति सन्ति भवताम्[2]। कति भार्या आर्याणाम्। [3]बहवः पुत्राः, किं त्रिचा एव देवकल्पानाम्। कियत्यः कन्या विश्वाधिकन्यायभाजाम्। जनयित्रीजनकौ [4]जनकौतुकदायित्वरितौ किमासाते, वसाते वा कौर्तिशेषपटं निष्कपटम्। इयन्ति दिनानि यावदावयोः किमिति दर्शनजनिर्नाजनि। [5]अयाचितं भृशं बलं शम्बलं किञ्चनाऽस्ति

शाखा वेदशाखा, काण्व-कुथुमि-माध्यन्दिनादि। विशाखः कार्त्तिकेयः। तदनुकल्पानां तत्सदृशानाम्।

द्वौ वा त्रयो वा इति त्रिचाः।

जनयित्रीजनकौ मातापितरौ। आसाते विद्येते। वसाते परिदधाते वा। कौर्त्तिशेषः शव पटं।

नास्ति वा। कथं निर्वाहो हव्यवाहोपमतीव्रतेजसां बोभवतीति भवभीतिजुषां विदुषाम्। नित्यं कर्म हर्म्य एव निर्मीयते निर्मलमनोभिः। अथवा पुष्कल-पुष्करे[1] पुष्करिणीतटे। एकवारमाहारः सारभूतः प्रभूताज्यः प्राज्यव्यञ्जनो भवति भवतां द्विर्वा। प्रथमं सन्तर्पितनभोजनं[2] भोजनं कियत्यां वेलायां सम्पनी-पद्यते। अत्र मैत्री धात्रीदिविषदां केन केन समम्। समन्ततो विशदपदकदम्बबन्धोपसंस्कृतं[3] संस्कृतं श्रीमतां श्रुतमेव स्वच्छन्दममन्दच्छन्दः[4]सन्दानितनितान्तकान्त-

बोभवतीति पुनः पुनः भवति। वः युष्माकम्। भव-भीतिजुषां संसारीति कृत्वा भयं आप्नुवताम्।

पुष्कलपुष्करे बहलपद्मयुक्ते।

प्रभूताज्यः प्रचुरघृतः। प्राज्यव्यञ्जनः। भूरितेमनः। द्विर्वा वारद्वयम्।

नभोजनः देवजनः। सम्पनीपद्यते भृशं सम्पन्नो भवति।

मैत्री मित्रता। धात्रीदिविषदां ब्राह्मणानाम्। छन्दः स्रग्धरादि, रज्जुभेदश्च। सन्दानिता बद्धा। गौः वाणी, पशुश्च।

१ 'पुष्करेषु पुष्करिणीतटेषु' B.

२ 'सन्तर्पिते सन्तर्प्याणां भोजनं' B.

३ 'सम्बन्धोपस्कृतं श्रीमतां' B.

४ 'च्छन्दःसम्पदातिपातिनितान्त' B.

कविताकान्तारे गौश्चरति । आत्मकृतिः कृतिव सापि[1] पश्यताम् । [2]अव्यग्रसमग्रगुणग्रामैर्ग्रामान्त गतमासीत् क्ष्मामौमन्तमणिभिः । अथवाऽचैवास्था स्थायिकीर्त्तिभिः । कियन्ति तीर्थानि प्रज्ञाऽवज्ञा गौर्वाणगुरुभिरभिवौक्षितानि । कियन्ति वाऽतिमा पवित्रया यात्रया निर्दम्भैः सम्भावनौयानि । भव भक्तिः शौतकिरणाभरणे भृङ्गिणमवगणयति । किमु कौस्तुभभूषणे[3] विभौषणं विशेषयति । सम्प्रति प्रति भाजुषां जिगमिषेव[4] लक्ष्यते [5]बलवलक्षयशसाम्

आत्मकृतिः स्वकरणं, कवितादि ।

क्ष्मामौमन्तमणिभिः पृथ्व्याः भूषणरूपैः इत्यर्थः ।

अस्थायि स्थितम् । स्थायिकौर्त्तिभिः अविनष्टयशोभिः ।

अतिमात्रं अतिशयम् ।

शौतकिरणाभरणे महादेवे । भृङ्गिणं भृङ्गरौटनामा शिवानुचरम् । अवगणयति तिरस्करोति ।

विभौषणं राक्षसेश्वरम् । विशेषयति जयति । सदृशयतौति यावत् ।

बलवलक्षं बलभद्रवत् शुक्लम् ।

---

१ 'कापि' B.
२ 'अव्यव्य(?)ग्र' B.
३ 'विभूषणे' B.
४ 'जिगमिषैव' B.
५ 'वलक्षयशसाम्' B.

अस्मन्मनीषितमखिलमेव सम्पूर्णमासीत्पौर्णमासीहि-मांशुमांसलकीर्त्तिमतां भवतामवलोकनेन, इति निः-प्रतिममतिभिरभिहिते यथाप्रश्नं लोकोत्तरैरुत्तरैरनु-मोद्याभिवाद्य च[1] वाद्यवेक्षणाकाङ्क्षया निरगामि, समागामि[2] च स्वामिसमीक्षणप्रतिक्षणविजृम्भमाण-कल्याणभरैरस्माभिः ॥

इति [3]तृतीयस्तबके विप्रसम्भाषणं नाम चतुर्थं कुसुमम् ॥ ४ ॥

मनीषितं मनोरथः। मांसलः महान्। यथाप्रश्नं प्रश्नं अनति-क्रम्य। लोकोत्तरैः लोके प्रधानैः। उत्तरैः प्रतिवचनैः। अनु-मोद्य अनु पश्चात् मोदयित्वा। अभिवाद्य नमस्कृत्य। वाद्यवेक्षणा-काङ्क्षया वादिनः अवेक्षणवाञ्छया। निरगामि निर्गतम्। समागामि सङ्गत च ॥

इति श्रीसूर्य्यकविराजविरचितायां बालबोधिकायां कविकल्प-लताटीकायां तृतीये स्तबके चतुर्थं कुसुमम् ॥ ४ ॥

---

१ 'भिवाद्य चेक्षणाका' B.

२ 'समगामि च' A. C., 'समागामि स्वा' B.

३ 'तृतीये कथास्तबके ब्राह्मणभाषणं नाम चतुर्थं कुसुमं समाप्त-मिति।' B.

अथ कश्चित्कुवलयावलीमिरि
व्याजविजृम्भमाणप्रयागपरभागं
क्षमाणाः, कुत्रापि करकमलव
कलशकलविलासधरपयोधरभर
रीयःस्वेदच्छेदमेदस्विनीर[3]समीर
नेत्रपात्रीकुर्वन्तः,[4] क्वापि कूपा
पात्रेभ्यः पावनजीवनदायिनो
कुतश्चित्पार्वतीपतिपादपयोजपूज
निर्वासिताऽशेषकल्मषोपसर्गं दु

खण्डं समूहः। परभागः अन्यतः
रम्यः कमनीयः। मेदस्वी महान्।
त्रपात्रीकृतवन्तः पश्यन्तः इत्यर्थः।
गवङ्गाः, रज्जुयुक्तेभ्यश्च। पात्रेभ्यः
नेभ्यश्च। पावनं पवित्रम्। जीवनं
पयन्तः। पदपयोजं पदपद्मम्। अ
निराकृतः। कलुषं पापम्। उपसर्गः

१ 'खण्डव्याजव्याजृम्भमाण' B.
२ 'साकाङ्क्ष(मीक्ष)मीक्षमाणाः' B
३ 'नीरसमीहित' B.
५ 'पूजनप्रयोजनश्रद्धाभिजनजननिवा

अपरत्र च[1] भवद्दक्षत्तटप्रतिभटहाटककपाटरचनास-
नाथं गोपुरं च परिचिन्वन्तः, अन्यत्र सुपर्वपर्वत-
गर्वसर्वङ्कषानिभान् निभालयन्तः, इतरत्र जवविजित-
कुरङ्गान् तुरङ्गान् रङ्गगतान् नटानिव नृत्यतो वीक्ष्य[2]
वीक्षणयुगलं सफलयन्तः, [3]क्वचिद्ध्वजवल्लिवेल्लनोल्ला-
सितभास्वत्तुरङ्गमगमनानि भवनानि नयनमीनयो-
रानायतां[4] नयन्तः, क्वचन काञ्चनवर्णां कर्णान्तविश्रा-

स्थानम् । प्रतिभटः समः । हाटकं सुवर्णम् । गोपुरं पुर-
द्वारम् । परिचिन्वन्तः पश्यन्तः । सुपर्व्वपर्व्वतः सुमेरुः । गर्व्व-
सर्व्वङ्कषः गर्व्वस्य सम्यक् उन्मूलकः । इभान् हस्तिनः । निभा-
लयन्तः पश्यन्तः, भाललोचने धन्तः (यन्तः ?) । कुरङ्गाः हरिणभेदः ।
रङ्गः नृत्यस्थानं, युद्धं च । ध्वजवल्ली पताका तस्याः वेल्लनं
कम्पनम् । उल्लासितः उत्क्षिप्तः । भास्वान् सूर्य्यः तस्य तुरङ्गः
वाहनः । भवनानि गृहाणि । नयनमीनयोः नयनमत्स्ययोः ।
आनायतां जालताम् । नयन्तः प्रापयन्तः पश्यन्तः इत्यर्थः ।
काञ्चन काञ्चित् अनिर्व्वचनीयाम् इत्यर्थः । लोचनाञ्चलः अपाङ्गम् ।

१ 'अपरत्र या(भ)वदक्ष' B. २ 'निरीक्ष(क्ष्य)' B.

३ 'कुत्रचिद्ध्वजवल्लिवेल्लल्लोलायितभास्व' B.

४ 'मीनयो(:)राजीवनीयतां' B.

(आ?)न्तचारुलोचनाञ्चलां [1]चरणसिञ्जानमञ्जुमञ्जी
नाद(न)नेदीयसां हृदयमदयमपहरन्तीं[2] कामि
मखिललक्षीकुर्वाणाः, निर्वाणाय निर्वाणाङ्गारला
द्राघयन्तः, वसुमतीसारं देवद्वारं समासाद्य [3]म
दन्तःकरणाः समवर्त्तिष्महि ॥ अनन्तरं निरन्तर
पक्रमन्निष्क्रामदनेकसेवकनिकायकायसम्बन्धं सा
र्बन्धं परितः परिहरन्तः सन्तमस[6]राशिनाशि प्रच

सिञ्जानः शब्दायमानः। मञ्जीरः नूपुरम्। नेदीयसां अनि
स्थानाम्। अदयं निर्द्दयं यथा स्यात्। अखिलचीकुर्व्व
पश्यन्तः। निर्व्वाणाय मुक्तये। निर्व्वाणाङ्गारलाघवं नि
तानललघुत्वम्। द्राघयन्तः दीर्घीकुर्व्वन्तः वर्द्धयन्तः इत्य
देवद्वारं राजद्वारम्। आसाद्य प्राप्य। माद्यदन्तःकरणाः ह
न्मानसाः। समवर्त्तिष्महि अभवाम।

निरन्तरं निबिडं यथा भवति। अपक्रमं एकदैव। निष्
मन्तः निर्गच्छन्तः। सेवकाः राजभृत्याः तेषां निकायः समू
र्निर्बन्धं सयत्नं यथा स्यात्। परितः सर्व्वतः। सन्त

१ 'चरणसञ्चरणासि' B.

२ 'हरन्तीमखिलचीकुर्वाणाः' B.

३ 'दान्तकरणाः' B.

४ 'निरन्तरप्रक्रमपक्रामदनेक' B.

५ 'निर्बन्धं' B.

६ 'राशि[नाशि]प्रचण्ड'

मार्त्तण्डमण्डलसम्प्रकाशसंकाशं[1] देवसकाशमनायाम-मायासिष्म ॥ सम्प्रति च न कं प्रति[2] प्रतिभाविभासितवदनो वादी । आवर्जिताऽजर्ज्जरकर्णाकलशीका-प्रेक्षावन्तः प्रतीक्षन्ते [3]चास्मदप्रज्ञजिह्वायुक्तिमुक्तां वाचोयुक्तिमुक्तावलीम् । तदचिरस्य निरस्य गर्वमेः तस्य भगवतीं भारतीं कण्ठपीठाधिष्ठा[यि]नीं[4] निर्माय

सर्व्वतः व्यापि ध्वान्तम् । 'अवसमन्धेभ्यस्तमसः' (५ । ४ । ७९ ।) इत्यच् समासान्तः । मार्त्तण्डः सूर्य्यः । सङ्काशं सदृशम् । देव-[स]काशं राजसान्निध्यम् । आयासिष्म आगताः स्म ।

अजर्ज्जरः अभग्नः । प्रेक्षावन्तः पण्डिताः । अप्रज्ञाः अनभिज्ञाः [जि]ह्वैव शुक्तिः मुक्तास्फोटः ततः मुक्तां निःसृताम् ।

तत् तस्मात् । अचिरस्य अचिरेणैव । निरस्य विनाश्य । एतस्य वादिनः । निर्माय कृत्वा । निर्मायं निष्कपटं यथा स्यात् । उपास्य संसेव्य । द्विपास्यं गणेशम् । अध्यवस्यामि

---

१ 'सप्रकाशकोशसंकाशं' B.

२ 'प्रति वचनकं प्रति प्रतिभाविभासितवदनवादि' B.

३ 'चाप्रज्ञ' B.

४ 'धिष्ठायिनीं निर्मायमुपास्य' B.

निर्मायमुपास्य च द्विपास्यमध्यवस्यामि पुरा पुराण
पुरुषोत्तमस्य[1] देवस्य विचित्रां स्तोत्रावलीम् ॥

इति [2]तृतीयस्तबके तडागादिवर्णनं नाम पञ्चमं कुसुमम् ॥

रचयिष्यामि। पुरा पूर्व्वम्। 'अध्यवस्यामि' इति पुराऽ
भविष्यति लट्।

पुराणपुरुषोपमस्य हरिसदृशस्य। देवस्य राज्ञः।

इति श्रीसूर्य्यकविराजविरचितायां बालबोधिकायां
तृतीये पञ्चमं कुसुमम् ॥ ५ ॥

---

१ 'पुरुषोपमस्य' B. २ 'इति तृतीये कथास्तबके' B

इत्यादिवादिमान्याय वचांस्युच्चार्य धैर्यवान् ।
प्रतीक्षेत विपक्षस्य भारतीं प्रातिकूलिकीम् ॥ १ ॥
ततः सरम्भसम्भारगम्भीरारम्भनिर्भराम् ।
विपक्षं क्षिप्रमाक्षिप्य वाचमुच्चारयेदिमाम् ॥ २ ॥
यन्मया सह दुर्बुद्धे! वाग्युद्धं कर्त्तुमिच्छसि ।
तत्पङ्गुः शृङ्गमुत्तुङ्गं मेरोरारोढुमिच्छसि ॥ ३ ॥
सुप्तसिंहसटाकृष्टिमष्टापदपदच्छिदाम् ।
व्याघ्रं शीघ्रं समाघ्रातुं शशकः सन्समीहसे ॥ ४ ॥
शुकशावः शशादस्य चञ्चुं चुम्बितुमिच्छसि ।
सर्पं 'सदर्पमङ्घ्रिभ्यां निष्पेष्टुं दुष्ट! वाञ्छसि ॥ ५ ॥
मण्डूकश्चण्डतां[२] धत्से [३]कुपिते(तो) नागसंसदि ।
श्रीखण्डखण्ड एरण्डः [४]सौरभ्यं तुच्छ सेवसे ॥ ॥

(१) प्रातिकूलिकीं अननुकूलाम् ।

(२) संरम्भः क्रोधः । क्षिप्रं शीघ्रम् ।

(४) सटाः कन्धरालोमानि । अष्टापदः शरभः ।

(५) शशादः श्येनः । चञ्चुः पक्षितुण्डम् ।

(६) श्रीखण्डः चन्दनः । सौरभ्यं सौगन्ध्यम् । तुषे प्रस्रवसि । रुषे क्रोधाय । 'निषेवसे' इति च पाठः ।

१ 'सुदर्प्पमंङ्घ्रिभ्यां' B. २ 'खण्डतां' B.
३ 'कुत्सितो' B. ४ 'खसौरभ्यं तुषे रुषे' B. A.

सम्प्रहर्तुं विषाणाभ्यां शक्रेभं वृषमिच्छसि ।
गिरिं पातयितुं दन्तौ दन्ताभ्याममिवाञ्छसि ॥ ७ ॥
दुर्बुद्धे! स्पर्द्धसे कीटः[१] प्रकटं कैटभारिणा ।
आखुर्विडालदशनानुत्पाटयितुमिच्छसि ॥ ८ ॥
इदं पाषाणदलनमन्धस्यालेख्यदर्शनम् ।
मृगतृष्णाम्भसि स्नानं कृष्णाहिमुखचुम्बनम् ॥ ९ ॥
तुलया तोलनं मेरोः करेण स्थगनं रवेः ।
खड्गधाराग्रसञ्चारः शिरसा गिरिभेदनम् ॥ १० ॥
नभसोऽङ्गुलिनिर्मानमयश्चणकचर्वणम् ।
अङ्गारशयनस्वापो मज्जयोऽयं त्वयेष्यते ॥ ११ ॥

(७) विषाणाभ्यां शृङ्गाभ्याम् । शक्रेभं ऐरावणम् ।

(८) कैटभारिणा विष्णुना । आखुः मूषिकः ।

(९) आलेख्यं चित्रम् । मृगतृष्णा मरीचिका । कृष्णाहिः कालसर्पः ।

(१०) तुलया तुलादण्डेन । तोलनं परिमाणं उत्तोलनम् । स्थगनं आच्छादनम् ।

(११) मानं परिमाणम् । अयश्चणकः लौहकलायः*। शयनं

---

१ 'कीट' B.

* 'चणको हरिमन्थकः' इत्यमरोक्तेः 'कलायः' इति कल्पनमयुक्तम् । कलायस्तु लोकख्यात-मटरवाचकसतीनकापरपर्यायः । 'कलायस्तु सतीनकः' । 'हरेणुरेणुकौ' इत्यमरः ।